### મહોપાધ્યાયશ્રીવિનયવિજયવિરચિતઃ

# શ્રી શાન્ત સુધારસઃ

## અનિત્ય ભાવના

### (શાર્દૂલવિક્રીડિતં વૃત્તમ્)

નીરન્ધ્રે ભવકાનને પરિગલત્ - પઞ્ચાશ્રવામ્ભોધરે,
નાના-કર્મલતા-વિતાનગહને, મોહાન્ધકારોદ્ધુરે।
ભ્રાન્તાનામિહ દેહિનાં હિતકૃતે, કારુણ્ય-પુણ્યાત્મભિ-
સ્તીર્થેશૈઃ પ્રથિતાસ્સુધારસકિરો, રમ્યા ગિરઃ પાન્તુ વઃ ॥૧॥

### (દ્રુતવિલમ્બિતં વૃત્તત્રયમ્)

સ્ફુરતિ ચેતસિ ભાવનયા વિના,
ન વિદુષામપિ શાન્ત-સુધારસઃ ।
ન ચ સુખં કૃશમપ્યમુના વિના,
જગતિ મોહ-વિષાદ-વિષાકુલે ॥૨॥
યદિ ભવભ્રમ-ખેદ-પરાઙ્મુખં,
યદિ ચ ચિત્તમનન્તસુખોન્મુખમ્ ।
શૃણુત તત્સુધિયઃ શુભભાવના-
ઽમૃતરસં મમ શાન્તસુધારસમ્ ॥૩॥
સુમનસો મનસિ શ્રુતપાવના,
નિદધતાં દ્વ્યધિકા દશ ભાવનાઃ ।
યદિહ રોહતિ મોહતિરોહિતા-
ઽદ્ભુતગતિર્વિદિતા સમતાલતા ॥૪॥

### (રથોદ્ધતાવૃત્તમ્)

આર્તરૌદ્રપરિણામપાવક-,પ્લુષ્ટ-ભાવુક-વિવેક-સૌષ્ઠવે ।
માનસે વિષયલોલુપાત્મનાં, ક્વ પ્રરોહતિતમાં શમાઙ્કુરઃ ॥૫॥

### (વસન્તતિલકાવૃત્તમ્)

યસ્યાશયં શ્રુતકૃતાતિશયં વિવેક-
પીયૂષ-વર્ષ-રમણીય-તમં શ્રયન્તે ।
સદ્ભાવના-સુરલતા ન હિ તસ્ય દૂરે,
લોકોત્તર-પ્રશમ-સૌખ્ય-ફલ-પ્રસૂતિઃ ॥૬॥

### (અનુષ્ટુબ્વૃત્તદ્વયમ્)

અનિત્યત્વા-ઽશરણતે, ભવમેકત્વમન્યતામ્ ।
અશૌચમાશ્રવં ચાત્મન્!, સંવરં પરિભાવય ॥૭॥
કર્મણો નિર્જરાં ધર્મ-સૂક્તતાં લોકપદ્ધતિમ્ ।
બોધિ-દુર્લભતામેતાં, ભાવયન્ મુચ્યસે ભવાત્ ॥૮॥

### (પુષ્પિતાગ્રાવૃત્તમ્)

વપુરવપુરિદં વિદભ્રલીલા-
પરિચિતમપ્યતિભઙ્ગુરં નરાણામ્ ।
તદતિભિદુર-યૌવનાવિનીતં,
ભવતિ કથં વિદુષાં મહોદયાય ॥૯॥

### (શાર્દૂલવિક્રીડિતવૃત્તદ્વયમ્)

આયુર્વાયુતરત્તરઙ્ગતરલં, લગ્નાપદઃ સમ્પદઃ;
સર્વેઽપીન્દ્રિયગોચરાશ્ચ ચટુલાઃ, સન્ધ્યાભ્રરાગાદિવત્ ।

મિત્રસ્ત્રીસ્વજનાદિસઙ્ગમસુખં, સ્વપ્નેન્દ્રજાલોપમં;
તત્ કિં વસ્તુ ભવે ભવેદિહ મુદા-માલમ્બનં યત્સતામ્ ॥૧૦॥
પ્રાતર્ભ્રાતરિહાવદાતરુચયો, યે ચેતનાચેતના;
દૃષ્ટા વિશ્વમનઃપ્રમોદવિદુરા, ભાવાઃ સ્વતઃ સુન્દરાઃ ।
તાંસ્તત્રૈવ દિને વિપાક-વિરસાન્, હા નશ્યતઃ પશ્યત-
શ્ચેતઃ પ્રેતહતં જહાતિ ન ભવ-પ્રેમાનુબન્ધં મમ ॥૧૧॥

## (પ્રથમભાવનાગેયાષ્ટકમ્-રામગિરિ-રાગ)

મૂઢ મુહ્યસિ મુધા મૂઢ મુહ્યસિ મુધા,
વિભવમનુચિન્ત્ય હૃદિ સપરિવારમ્ ।
કુશશિરસિ નીરમિવ ગલદનિલ-કમ્પિતં,
વિનય જાનીહિ જીવિતમસારમ્ ॥૧॥
પશ્ય ભઙ્ગુરમિદં વિષયસુખ-સૌહૃદં,
પશ્યતામેવ નશ્યતિ સહાસમ્ ।
એતદનુહરતિ સંસારરૂપં રયા-
જ્જ્વલજ્જલબાલિકા-રુચિવિલાસમ્ ॥૨॥
હન્ત હતયૌવનં, પુચ્છમિવ શૌવનં,
કુટિલમતિ તદપિ લઘુદૃષ્ટનષ્ટમ્;
તેન બત પરવશાઃ પરવશા-હતધિયઃ,
કટુકમિહ કિં ન કલયન્તિ કષ્ટમ્ ॥૩॥
યદપિ પિણ્યાકતામઙ્ગમિદમુપગતં,
ભુવનદુર્જયજરાપીતસારમ્ ।
તદપિ ગતલજ્જમુજ્ઝતિ મનો નાઙ્ગિનાં,
વિતથમતિ કુથિતમન્મથવિકારમ્ ॥૪॥
સુખમનુત્તરસુરાવધિ યદતિમેદુરં,
કાલતસ્તદપિ કલયતિ વિરામમ્ ।
કતરદિતરત્તદા વસ્તુ સાંસારિકં,
સ્થિરતરં ભવતિ ચિન્તય નિકામમ્ ॥૫॥
યૈઃ સમં ક્રીડિતા યે ચ ભૃશમીડિતા,
યૈઃ સહાકૃષ્મહિ પ્રીતિવાદમ્ ।
તાન્ જનાન્ વીક્ષ્ય બત ભસ્મભૂયઙ્ગતાન્,
નિર્વિશઙ્કાઃ સ્મ ઇતિ ધિક્ પ્રમાદમ્ ॥૬॥
અસકૃદુન્મિષ્ય નિમિષન્તિ સિન્ધૂર્મિવ-
ચ્ચેતનાચેતનાઃ સર્વભાવાઃ ।
ઇન્દ્રજાલોપમાઃ સ્વજનધનસઙ્ગમા-
સ્તેષુ રજ્યન્તિ મૂઢસ્વભાવાઃ ॥૭॥
કવલયન્નવિરતં જઙ્ગમાજઙ્ગમં,
જગદહો નૈવ તૃપ્યતિ કૃતાન્તઃ ।
મુખગતાન્ ખાદતસ્તસ્ય કરતલગતૈ-
ર્ન કથમુપલપ્સ્યતેઽસ્માભિરન્તઃ ॥૮॥
નિત્યમેકં ચિદાનન્દમયમાત્મનો,
રૂપમભિરૂપ્ય સુખમનુભવેયમ્ ।
પ્રશમરસ-નવસુધા-પાનવિનયોત્સવો,
ભવતુ સતતં સતામિહ ભવેઽયમ્ ॥૯॥

## અશરણ ભાવના
### (શાર્દૂલવિક્રીડિતમ્)

યે ષટ્ખણ્ડમહીમહીનતરસા, નિર્જિત્ય બભ્રાજિરે,
યે ચ સ્વર્ગભુજો ભુજોઽર્જિતમદા, મેદુર્મુદા મેદુરાઃ ।
તેઽપિ ક્રૂરકૃતાન્તવક્ત્રરદનૈ-ર્નિર્દલ્યમાના હઠા-
દત્રાણાઃ શરણાય હા દશદિશઃ, પ્રૈક્ષન્ત દીનાનનાઃ ॥૧॥

### (સ્વાગતાવૃત્તમ્)

તાવદેવ મદવિભ્રમમાલી, તાવદેવ ગુણગૌરવશાલી;
યાવદક્ષમ-કૃતાન્ત-કટાક્ષૈ-ર્નેક્ષિતો વિશરણો નરકીટઃ ॥૨॥

### (શિખરિણીવૃત્તમ્)

પ્રતાપૈર્વ્યાપન્નં ગલિતમથ તેજોભિરુદિતૈ-
ર્ગતં ધૈર્યોદ્યોગૈઃ શ્લથિતમથ પુષ્ટેન વપુષા ।
પ્રવૃત્તં તદ્દ્રવ્યગ્રહણવિષયે બાન્ધવજનૈ-
ર્જને કીનાશેન પ્રસભમુપનીતે નિજવશમ્ ॥૩॥

### (દ્વિતીયભાવનાગેયાષ્ટકમ્ મારૂણી-રાગ)

સ્વજનજનો બહુધા હિતકામં, પ્રીતિરસૈરભિરામમ્ ।
મરણદશાવશમુપગતવન્તં, રક્ષતિ કોઽપિ ન સન્તમ્ ॥
વિનય! વિધીયતાં રે, શ્રીજિનધર્મઃ શરણમ્;
અનુસન્ધીયતાં રે, શુચિતરચરણસ્મરણમ્. ॥૧॥
તુરગરથેભનરાવૃતિકલિતં, દધતં બલમસ્ખલિતમ્ ।
હરતિ યમો નરપતિમપિ દીનં, મૈનિક ઇવ લઘુમીનમ્. ॥૨॥
પ્રવિશતિ વજ્રમયે યદિ સદને, તૃણમથ ઘટયતિ વદને ।
તદપિ ન મુઞ્ચતિ હતસમવર્તી, નિર્દય પૌરુષનર્તી. ॥૩॥
વિદ્યામન્ત્રમહૌષધિસેવાં, સૃજતુ વશીકૃતદેવામ્ ।
રસતુ રસાયનમુપચયકરણં. તદપિ ન મુઞ્ચતિ મરણમ્. ॥૪॥
વપુષિ ચિરં નિરુણદ્ધિ સમીરં, પતતિ જલધિપરતીરમ્ ।
શિરસિ ગિરેરધિરોહતિ તરસા, તદપિ સ જીર્યતિ જરસા ॥૫॥
સૃજતીમસિતશિરોરુહલલિતં, મનુજશિરઃ સિતપલિતમ્ ।
કો વિદધાનાં ભૂઘનમરસં, પ્રભવતિ રોદ્ધું જરસમ્. ॥૬॥
ઉદ્યત ઉગ્રરુજા જનકાયઃ, કઃ સ્યાત્તત્ર સહાયઃ ।
એકોઽનુભવતિ વિધુરુપરાગં, વિભજતિ કોઽપિ ન ભાગમ્ ॥૭॥
શરણમેકમનુસર ચતુરઙ્ગં, પરિહર મમતાસઙ્ગમ્ ।
વિનય! રચય શિવસૌખ્યનિધાનં, શાન્તસુધારસપાનમ્. ॥૮॥

## સંસાર ભાવના
### (શિખરિણી વૃત્તત્રયમ્)

ઇતો લોભઃ ક્ષોભં, જનયતિ દુરન્તો દવ ઇવો-
લ્લસલ્લાભામ્ભોભિઃ, કથમપિ ન શક્યઃ શમયિતુમ્ ।
ઇતસ્તૃષ્ણાઽક્ષાણાં, તુદતિ મૃગતૃષ્ણેવ વિફલા,
કથં સ્વસ્થૈઃ સ્થેયં, વિવિધભયભીમે ભવવને ॥૧॥
ગલત્યેકા ચિન્તા, ભવતિ પુનરન્યા તદધિકા,
મનોવાક્કાયે હા! વિકૃતિરતિરોષાત્તરજસઃ ।
વિપદ્ગર્તાવર્તે, ઝટિતિ પતયાલોઃ પ્રતિપદં
ન જન્તોઃ સંસારે, ભવતિ કથમપ્યર્તિવિરતિઃ ॥૨॥
સહિત્વા સન્તાપા-નશુચિજનનીકુક્ષિકુહરે,
તતો જન્મ પ્રાપ્ય, પ્રચુરતરકષ્ટક્રમહતઃ ।

સુખાભાસૈર્યાવત્, સ્પૃશતિ કથમપ્યર્તિવિરતિં,
જરા તાવત્ કાયં, કવલયતિ મૃત્યોઃ સહચરી ॥૩॥

**(ઇન્દ્રવજ્રાવૃત્તમ્)**

વિભ્રાન્તચિત્તો બત બમ્ભ્રમીતિ,
પક્ષીવ રુદ્ધસ્તનુપઞ્જરેઙ્ગી ।
નુન્નો નિયત્યાઽતનુકર્મતન્તુ-
સન્દાનિતઃ સન્નિહિતાન્તકૌતુઃ ॥૪॥

**(અનુષ્ટુબ્વૃત્તમ્)**

અનન્તાન્ પુદ્ગલાવર્તા-નનન્તાનન્તરૂપભૃત્ ।
અનન્તશો ભ્રમત્યેવ, જીવોઽનાદિભવાર્ણવે ॥૫॥

**(તૃતીયભાવનાગેયાષ્ટકમ્ કેદાર-રાગ)**

કલય સંસારમતિદારુણં, જન્મમરણાદિભયભીત રે ।
મોહરિપુણેહ સગલગ્રહં, પ્રતિપદં વિપદમુપનીત રે ॥૧॥
સ્વજનતનયાદિપરિચયગુણૈ-રિહ મુધા બધ્યસે મૂઢ રે ।
પ્રતિપદં નવનવૈરનુભવૈઃ, પરિભવૈરસકૃદુપગૂઢ રે ॥૨॥
ઘટયસિ ક્વચન મદમુન્નતેઃ, ક્વચિદહો હીનતાદીન રે ।
પ્રતિભવં રૂપમપરાપરં, વહસિ બત કર્મણાધીન રે ॥૩॥
જાતુ શૈશવદશાપરવશો, જાતુ તારુણ્યમદમત્ત રે ।
જાતુ દુર્જયજરાજર્જરો, જાતુ પિતૃપતિકરાયત્ત રે ॥૪॥
વ્રજતિ તનયોઽપિ નનુ જનકતાં, તનયતાં વ્રજતિ પુનરેષ રે
ભાવયન્વિકૃતિમિતિ ભવગતે-સ્ત્યજતમાં નૃભવશુભશેષ રે ॥૫॥
યત્ર દુઃખાર્તિગદદવલવૈ-રનુદિનં દહ્યસે જીવ રે ।
હન્ત તત્રૈવ રજ્યસિ ચિરં, મોહમદિરામદક્ષીબ રે ॥૬॥
દર્શયન્ કિમપિ સુખવૈભવં, સંહરંસ્તદથ સહસૈવ રે ।
વિપ્રલમ્ભયતિ શિશુમિવ જનં, કાલબટુકોઽયમત્રૈવ રે ॥૭॥
સકલસંસારભયભેદકં, જિનવચો મનસિ નિબધાન રે ।
વિનય પરિણમય નિઃશ્રેયસં, વિહિતશમરસસુધાપાન રે ॥૮॥

ઇતિ તૃતીયઃ પ્રકાશઃ

## એકત્વ ભાવના

**(સ્વાગતાવૃત્તમ્)**

એક એવ ભગવાનયમાત્મા, જ્ઞાનદર્શનતરઙ્ગસરઙ્ગઃ ।
સર્વમન્યદુપકલ્પિતમેતદ્, વ્યાકુલીકરણમેવ મમત્વમ્ ॥૧॥

**(પ્રબોધતાવૃત્તત્રયમ્)**

અબુધૈઃ પરભાવલાલસા-લસદજ્ઞાનદશાવશાત્મભિઃ ।
પરવસ્તુષુ હા સ્વકીયતા, વિષયાવેશવશાદ્ વિકલ્પ્યતે ॥૨॥
કૃતિનાં દયિતેતિ ચિન્તનં, પરદારેષુ યથા વિપત્તયે ।
વિવિધાર્તિભયાવહં તથા, પરભાવેષુ મમત્વભાવનમ્ ॥૩॥
અધુના પરભાવસંવૃતિં, હર ચેતઃ પરિતોઽવગુણ્ઠિતામ્ ।
ક્ષણમાત્મવિચારચન્દન-દ્રુમવાતોર્મિરસાઃ સ્પૃશન્તુ મામ્ ॥૪॥

**(અનુષ્ટુબ્વૃત્તમ્)**

એકતાં સમતોપેતા-મેનામાત્મન્ વિભાવય ।
લભસ્વ પરમાનન્દ-સમ્પદં નમિરાજવત્ ॥૫॥
(ચતુર્થ ભાવનાગેયાષ્ટકમ્ પરજીયા-રાગ)
વિનય ચિન્તય વસ્તુતત્ત્વં, જગતિ નિજમિહ કસ્ય કિમ્ ।

ભવતિ મતિરિતિ યસ્ય હૃદયે, દુરિતમુદયતિ તસ્ય કિમ્ ॥૧॥
એક ઉત્પદ્યતે તનુમા-નેક એક વિપદ્યતે ।
એક એવ હિ કર્મ ચિનુતે, સૈક્કઃ ફલમશ્નુતે ॥૨॥
યસ્ય યાવાન્ પરપરિગ્રહો, વિવિધમમતાવીવધઃ ।
જલધિવિનિહિતપોતયુક્ત્યા, પતતિ તાવદસાવધઃ ॥૩॥
સ્વસ્વભાવં મદ્યમુદિતો, ભુવિ વિલુપ્ય વિચેષ્ટતે ।
દૃશ્યતાં પરભાવઘટનાત્, પતતિ વિલુઠતિ જૃમ્ભતે ॥૪॥
પશ્ય કાઞ્ચનમિતરપુદ્ગલ-મિલિતમઞ્ચતિ કાં દશામ્ ।
કેવલસ્ય તુ તસ્ય રૂપં, વિદિતમેવ ભવાદૃશામ્ ॥૫॥
એવમાત્મનિ કર્મવશતો, ભવતિ રૂપમનેકધા ।
કર્મમલરહિતે તુ ભગવતિ, ભાસતે કાઞ્ચનવિધા ॥૬॥
જ્ઞાનદર્શનચરણપર્યવ-પરિવૃતઃ પરમેશ્વરઃ ।
એક એવાનુભવસદને, સ રમતામવિનશ્વરઃ ॥૭॥
રુચિરસમતામૃતરસં ક્ષણ-મુદિતમાસ્વાદય મુદા ।
વિનય! વિષયાતીતસુખરસ-રતિરુદઞ્ચતુ તે સદા ॥૮॥

ઇતિ ચતુર્થઃ પ્રકાશઃ

## અન્યત્વ ભાવના

### (ઉપજાતિવૃત્તમ્)

પરઃ પ્રવિષ્ટઃ કુરુતે વિનાશં,
લોકોક્તિરેષા ન મૃષેતિ મન્યે ।
નિર્વિશ્ય કર્માણુભિરસ્ય કિં કિં,
જ્ઞાનાત્મનો નો સમપાદિ કષ્ટમ્ ॥૧॥

### (સ્વાગતાવૃત્તમ્)

ખિદ્યસે નનુ કિમન્યકથાર્તઃ,
સર્વદૈવ મમતાપરતન્ત્રઃ ।
ચિન્તયસ્યનુપમાન્ કથમાત્મન્,
નાત્મનો ગુણમણીન્ન કદાપિ ॥૨॥

### (શાર્દૂલવિક્રીડિતવૃત્તદ્વયમ્)

યસ્મૈ ત્વં યતસે બિભેષિ ચ યતો, યત્રાનિશં મોદસે,
યદ્યચ્છોચસિ યદ્યદિચ્છસિ હૃદા, યત્પ્રાપ્ય પેપ્રીયસે ।
સ્નિગ્ધો યેષુ નિજસ્વભાવમમલં, નિર્લોઠ્ય લાલપ્યસે,
તત્સર્વં પરકીયમેવ ભગવન્,- નાત્મન્ન કિઞ્ચિત્તવ ॥૩॥
દુષ્ટાઃ કષ્ટકદર્થનાઃ કતિ ન તાઃ, સોઢાસ્ત્વયા સંસૃતૌ,
તિર્યઙ્નારકયોનિષુ પ્રતિહતશ્છિન્નો વિભિન્નો મુહુઃ ।
સર્વં તત્ પરકીયદુર્વિલસિતં, વિસ્મૃત્ય તેષ્વેવ હા,
રજ્યન્ મુહ્યસિ મૂઢ! તાનુપચરન્,-નાત્મન્ન કિં લજ્જસે ॥૪॥

### (અનુષ્ટુબ્વૃત્તમ્)

જ્ઞાનદર્શનચારિત્ર-કેતનાં ચેતનાં વિના ।
સર્વમન્યદ્વિનિશ્ચિત્ય, યતસ્વ સ્વહિતાપ્તયે ॥૫॥

(પઞ્ચમભાવનાગેયાષ્ટકમ્ શ્રી-રાગ)
વિનય! નિભાલય નિજ ભવનં
વિનય! નિભાલય નિજ ભવનમ્ ।
તનુધનસુતસદન - સ્વજનાદિષુ
કિં નિજમિહ કુગતેરવનમ્ વિ. ॥૧॥

યેન સહાશ્રયસેऽતિવિમોહા-દિદમહમિત્યવિભેદમ્ ।
તદપિ શરીરં નિયતમધીરં, ત્યજતિ ભવન્તં ધૃતખેદમ્ ॥૨॥
જન્મનિ જન્મનિ વિવિધપરિગ્રહ-મુપચિનુષે ચ કુટુમ્બમ્ ।
તેષુ ભવન્તં પરભવગમને, નાનુસરતિ કૃશમપિ શુમ્બમ્ ॥૩॥
ત્યજ મમતાપરિતાપનિદાનં, પરપરિચયપરિણામમ્ ।
ભજ નિઃસઙ્ગતયા વિશદીકૃત-મનુભવસુખરસમભિરામમ્ ॥૪॥
પથિ પથિ વિવિધપથૈઃ પથિકૈઃ સહ, કુરુતે કઃ પ્રતિબન્ધમ્ ।
નિજનિજકર્મવશૈઃ સ્વજનૈઃ સહ, કિં કુરુષે મમતાબન્ધમ્ ॥૫॥
પ્રણયવિહીને દધદભિષઙ્ગં, સહતે બહુસન્તાપમ્ ।
ત્વયિ નિઃપ્રણયે પુદ્ગલનિચયે, વહસિ મુધા મમતાતાપમ્ ॥૬॥
ત્યજ સંયોગં નિયતવિયોગં, કુરુ નિર્મલમવધાનમ્ ।
નહિ વિદધાનઃ કથમપિ તૃપ્યસિ, મૃગતૃષ્ણાઘનરસપાનમ્ ॥૭॥
ભજ જિનપતિમસહાયસહાયં, શિવગતિસુગમોપાયમ્ ।
પિબ ગદશમનં પરિહૃતવમનં, શાન્તસુધારસમનપાયમ્ ॥૮॥

ઇતિ પઞ્ચમઃ પ્રકાશઃ

## અશુચિ ભાવના

### (શાર્દૂલવિક્રીડિતં વૃત્તમ્)

સચ્છિદ્રો મદિરાઘટઃ પરિગલત્-તલ્લેશસઙ્ગાશુચિઃ,
શુચ્યામૃદ્ય મૃદા બહિઃ સ બહુશો ધૌતોऽપિ ગઙ્ગોદકૈઃ ।
નાધત્તે શુચિતાં યથા તનુભૃતાં, કાયો નિકાયો મહા-
બીભત્સાસ્થિપુરીષમૂત્રરજસાં, નાયં તથા શુદ્ધ્યતિ ॥૧॥

### (મન્દાક્રાન્તા વૃત્તમ્)

સ્નાયં સ્નાયં, પુનરપિ પુનઃ, સ્નાન્તિ શુદ્ધાભિરદ્ભિ-
વારં વારં, બત મલતનું ચન્દનૈરર્ચયન્તે ।
મૂઢાત્માનો, વયમપમલાઃ, પ્રીતિમિત્યાશ્રયન્તે,
નો શુધ્યન્તે, કથમવકરઃ, શક્યતે શોદ્ધુમેવમ્ ॥૨॥

### (શાર્દૂલવિક્રીડિતં વૃત્તમ્)

કર્પૂરાદિભિરર્ચિતોऽપિ લશુનો, નો ગાહતે સૌરભં,
નાજન્મોપકૃતોऽપિ હન્ત પિશુનઃ, સૌજન્યમાલમ્બતે ।
દેહો-ऽપ્યેષ તથા જહાતિ ન નૃણાં સ્વાભાવિકીં વિસ્રતાં,
નાભ્યક્તોऽપિ વિભૂષિતોऽપિ બહુધા, પુષ્ટોऽપિ વિશ્વસ્યતે ॥૩॥

### (ઉપેન્દ્રવજ્રાવૃત્તમ્)

યદીયસંસર્ગમવાપ્ય સદ્યો, ભવેચ્છુચીનામશુચિત્વમુચ્ચૈઃ ।
અમેધ્યયોનેર્વપુષોऽસ્ય શૌચ-સઙ્કલ્પમોહોऽયમહો મહીયાન્

### (સ્વાગતાવૃત્તમ્)

ઇત્યવેત્ય શુચિવાદમતથ્યં, પથ્યમેવ જગદેકપવિત્રમ્ ।
શોધનં સકલદોષમલાનાં, ધર્મમેવ હૃદયે નિદધીથાઃ ॥૫॥

### (ષષ્ઠભાવનાગેયાષ્ટકમ્-આશાવરી-રાગ)

ભાવય રે વપુરિદમતિમલિનં,
વિનય વિબોધય માનસનલિનમ્ ।
પાવનમનુચિન્તય વિભુમેકં,
પરમમહોદયમુદિતવિવેકમ્. ॥૧॥

દમ્પતિરેતોરુધિરવિવર્તે,
કિં શુભમિહ મલકશ્મલગર્તે ।
ભૃશમપિ પિહિતઃ સ્રવતિ વિરૂપં,
કો બહુ મનુતે-ઽવસ્કરકૂપમ્ ॥૨॥
ભજતિ સચન્દ્રં શુચિતામ્બૂલં,
કર્તું મુખમારુતમનુકૂલમ્ ।
તિષ્ઠતિ સુરભિ કિયન્તં કાલં,
મુખમસુગન્ધિ જુગુપ્સિતલાલમ્ ॥૩॥
અસુરભિગન્ધવહો-ઽન્તરચારી,
આવરિતું શક્યો ન વિકારી ।
વપુરુપજિઘ્રસિ વારંવારં,
હસતિ બુધસ્તવ શૌચાચારમ્. ॥૪॥
દ્વાદશ નવ રન્ધ્રાણિ નિકામં,
ગલદશુચીનિ ન યાન્તિ વિરામમ્ ।
યત્ર વપુષિ તત્ કલયસિ પૂતં,
મન્યે તવ નૂતનમાકૂતમ્. ॥૫॥
અશિતમુપસ્કરસંસ્કૃતમન્નં,
જગતિ જુગુપ્સાં જનયતિ હન્નમ્ ।
પુંસવનં ધૈનવમપિ લીઢં,
ભવતિ વિગર્હિતમતિ જનમીઢમ્. ॥૬॥
કેવલમલમયપુદ્ગલનિચયે,
અશુચીકૃતશુચિભોજનસિચયે ।
વપુષિ વિચિન્તય પરમિહ સારં,
શિવસાધનસામર્થ્યમુદારમ્ ॥૭॥
યેન વિરાજિતમિદમતિપુણ્યં,
તચ્ચિન્તય ચેતન! નૈપુણ્યમ્ ।
વિશદાગમમધિગમ્ય નિપાનં,
વિરચય શાન્તસુધારસપાનમ્ ॥૮॥

## આશ્રવ ભાવના

### (ભુજઙ્ગપ્રયાતં વૃત્તમ્)

યથા સર્વતો નિર્ઝરૈરાપતદ્ભિઃ,
પ્રપૂર્યેત સદ્યઃ પયોભિસ્તટાકઃ ।
તથૈવાશ્રવૈઃ કર્મભિઃ સમ્ભૃતોઽઙ્ગી,
ભવેદ્ વ્યાકુલશ્ચઞ્ચલઃ પઙ્કિલશ્ચ ॥૧॥

### (શાર્દૂલવિક્રીડિતં વૃત્તમ્)

યાવત્કિઞ્ચિદિવાનુભૂય તરસા, કર્મેહ નિર્જીર્યતે,
તાવચ્ચાશ્રવશત્રવોઽનુસમયં, સિઞ્ચન્તિ ભૂયોઽપિ તત્ ।
હા કષ્ટં કથમાશ્રવપ્રતિભટાઃ શક્યા નિરોદ્ધું મયા;
સંસારાદતિભીષણાન્મમ હહા, મુક્તિઃ કથં ભાવિની ॥૨॥

### (પ્રહર્ષિણી વૃત્તમ્)

મિથ્યાત્વાવિરતિકષાયયોગસંજ્ઞા-
શ્ચત્વારઃ સુકૃતિભિરાશ્રવાઃ પ્રદિષ્ટાઃ ।
કર્માણિ પ્રતિસમયં સ્ફુટૈરમીભિ-
ર્બધ્નન્તો ભ્રમવશતો ભ્રમન્તિ જીવાઃ ॥૩॥

### (રથોદ્ધતાવૃત્તમ્)

ઇન્દ્રિયાવ્રતકષાયયોગજાઃ, પઞ્ચ પઞ્ચ ચતુરન્વિતાસ્ત્રયઃ ।
પઞ્ચવિંશતિરસત્ક્રિયા ઇતિ, નેત્રવેદપરિસઙ્ખ્યયાઽપ્યમી ॥૪॥

**(ઇન્દ્રવજ્રાવૃત્તમ્)**

ઇત્યાશ્રવાણામધિગમ્ય તત્ત્વં,
નિશ્ચિત્ય સત્ત્વં શ્રુતિસન્નિધાનાત્ ।
એષાં નિરોધે વિગલદ્વિરોધે,
સર્વાત્મના દ્રાગ્ યતિતવ્યમાત્મન્ ॥૫॥

**(સપ્તમભાવનાગેયાષ્ટકમ્ ધનાશ્રી-રાગ)**

પરિહરણીયા રે, સુકૃતિભિરાશ્રવા, હૃદિ સમતામવધાય ।
પ્રભવન્ત્યેતે રે, ભૃશમુચ્છૃઙ્ખલા, વિભુગુણવિભવવધાય ॥૧॥
કુગુરુનિયુક્તા રે, કુમતિપરિપ્લુતાઃ, શિવપુરપથમપહાય ।
પ્રયતન્તેઽમી રે, ક્રિયયા દુષ્ટયા, પ્રત્યુત શિવવિરહાય ॥૨॥
અવિરતચિત્તા રે, વિષયવશીકૃતા, વિષહન્તે વિતતાનિ ।
ઇહપરલોકે રે, કર્મવિપાકજા-ન્યવિરલદુઃખશતાનિ ॥૩॥
કરિઝષમધુપા રે, શલભમૃગાદયો, વિષયવિનોદરસેન ।
હન્ત લભન્તે રે, વિવિધા વેદના, બત પરિણતિવિરસેન ॥૪॥
ઉદિતકષાયા રે, વિષયવશીકૃતા, યાન્તિ મહાનરકેષુ ।
પરિવર્તન્તે રે, નિયતમનન્તશો, જન્મજરામરણેષુ ॥૫॥
મનસા વાચા રે, વપુષા ચઞ્ચલા, દુર્જયદુરિતભરેણ ।
ઉપલિપ્યન્તે રે, તત આશ્રવજયે, યતતાં કૃતમપરેણ ॥૬॥
શુદ્ધા યોગા રે, યદપિ યતાત્મનાં, સ્રવન્તે શુભકર્માણિ ।
કાઞ્ચનનિગડાં-સ્તાન્યપિ જાનીયાત્, હત નિર્વૃતિશર્માણિ ॥૭॥
મોદસ્વૈવં રે, સાશ્રવપાપ્મનાં, રોધે ધિયમાધાય ।
શાન્તસુધારસ-પાનમનારતમ્, વિનય વિધાય વિધાય ॥૮॥

ઇતિ સપ્તમઃ પ્રકાશઃ

## સંવર ભાવના

**(સ્વાગતાવૃત્તદ્વયમ્)**

યેન યેન ય ઇહાશ્રવરોધઃ, સમ્ભવેન્નિયતમૌપયિકેન ।
આદ્રિયસ્વ વિનયોદ્યતચેતા-સ્તત્તદાન્તરદૃશા પરિભાવ્ય ॥૧॥
સંયમેન વિષયાવિરતત્વે, દર્શનેન વિતથાઽભિનિવેશમ્ ।
ધ્યાનમાર્તમથ રૌદ્રમજસ્રં, ચેતસઃ સ્થિરતયા ચ નિરુન્ધ્યાઃ ॥૨॥

**(શાલિનીવૃત્તમ્)**

ક્રોધં ક્ષાન્ત્યા માર્દવેનાભિમાનં, હન્યા માયા-માર્જવેનોજ્જ્વલેન
લોભં વારાંરાશિરૌદ્રં નિરુન્ધ્યાઃ, સન્તોષેણ પ્રાંશુના સેતુનેવ॥૩॥

**(સ્વાગતાવૃત્તમ્)**

ગુપ્તિભિસ્તિસૃભિરેવમજય્યાન્, ત્રીન્ વિજિત્ય તરસાધમયોગાન્
સાધુસંવરપથે પ્રયતેથા, લપ્સ્યસે હિતમનીહિતમિદ્ધમ્ ॥૪॥

**(મન્દાક્રાન્તાવૃત્તમ્)**

એવં રુદ્ધે-ષ્વમલહૃદયૈ-રાશ્રવેષ્વાપ્તવાક્ય-
શ્રદ્ધાચઞ્ચત્-સિતપટપટુઃ, સુપ્રતિષ્ઠાનશાલી ।
શુદ્ધૈર્યોગૈ- ર્જવનપવનૈઃ, પ્રેરિતો જીવપોતઃ,
સ્રોતસ્તીર્ત્વા, ભવજલનિધે-ર્યાતિ નિર્વાણપુર્યામ્ ॥૫॥

**(અષ્ટમભાવનાગેયાષ્ટકમ્ નટ-રાગ)**

શૃણુશિવસુખસાધનસદુપાયમ્, શૃણુ શિવસુખસાધનસદુપાયમ્;
જ્ઞાનાદિકપાવનરત્નત્રય-પરમારાધનમનપાયમ્. ॥૧॥
વિષયવિકારમપાકુરુ દૂરં, ક્રોધં માનં સહ માયમ્ ।
લોભરિપું ચ વિજિત્ય સહેલં, ભજ સંયમગુણમકષાયમ્ ॥૨॥
ઉપશમરસમનુશીલય મનસા, રોષદહનજલદપ્રાયમ્ ।
કલય વિરાગં ધૃતપરભાગં, હૃદિ વિનયં નાયં નાયમ્ ॥૩॥
આર્તં રૌદ્રં ધ્યાનં માર્જય, દહ વિકલ્પરચનાઽનાયમ્ ।
યદિયમરુદ્ધા માનસવીથી, તત્ત્વવિદઃ પન્થા નાઽયમ્ ॥૪॥
સંયમયોગૈરવહિતમાનસ-શુદ્ધ્યા ચરિતાર્થય કાયમ્ ।
નાનામતરુચિગહને ભુવને, નિશ્ચિનુ શુદ્ધપથં નાયમ્ ॥૫॥
બ્રહ્મવ્રતમઙ્ગીકુરુ વિમલં, બિભ્રાણં ગુણસમવાયમ્ ।
ઉદિતં ગુરુવદનાદુપદેશં, સઙ્ગૃહાણ શુચિમિવ રાયમ્ ॥૬॥
સંયમવાઙ્મયકુસુમરસૈરતિ-સુરભય નિજમધ્યવસાયમ્ ।
ચેતનમુપલક્ષય કૃતલક્ષણ-જ્ઞાનચરણગુણપર્યાયમ્ ॥૭॥
વદનમલઙ્કુરુ પાવનરસનં, જિનચરિતં ગાયં ગાયમ્ ।
સવિનય શાન્તસુધારસમેનં, ચિરં નન્દ પાયં પાયમ્ ॥૮॥

ઇતિ અષ્ટમઃ પ્રકાશઃ

## નિર્જરા ભાવના

### (ઇન્દ્રવજ્રાવૃત્તમ્)

યન્નિર્જરા દ્વાદશધા નિરુક્તા, તદ્ દ્વાદશાનાં તપસાં વિભેદાત્
હેતુપ્રભેદાદિહ કાર્યભેદઃ, સ્વાતન્ત્ર્યતસ્ત્વેકવિધૈવ સા સ્યાત્॥૧॥

### (અનુષ્ટુબ્ વૃત્તદ્વયમ્)

કાષ્ઠોપલાદિરૂપાણાં, નિદાનાનાં વિભેદતઃ ।
વહ્નિર્યથૈકરૂપોઽપિ, પૃથગ્રૂપો વિવક્ષ્યતે ॥૨॥
નિર્જરાપિ દ્વાદશધા, તપોભેદૈસ્તથોદિતા ।
કર્મનિર્જરણાત્મા તુ, સૈકરૂપૈવ વસ્તુતઃ ॥૩॥

### (ઉપેન્દ્રવજ્રાવૃત્તમ્)

નિકાચિતાનામપિ કર્મણાં યદ્, ગરીયસાં ભૂધરદુર્ધરાણામ્ ।
વિભેદને વજ્રમિવાતિતીવ્રં, નમોઽસ્તુ તસ્મૈ તપસેઽદ્ભુતાય ॥૪॥

### (ઉપજાતિવૃત્તમ્)

કિમુચ્યતે સત્તપસઃ પ્રભાવઃ, કઠોરકર્માર્જિતકિલ્બિષોઽપિ ।
દૃઢપ્રહારીવ નિહત્ય પાપં, યતો-ઽપવર્ગં લભતેઽચિરેણ ॥૫॥
યથા સુવર્ણસ્ય શુચિસ્વરૂપં, દીપ્તઃ કૃશાનુઃ પ્રકટીકરોતિ ।
તથાત્મનઃ કર્મરજો નિહત્ય, જ્યોતિસ્તપસ્તદ્વિશદીકરોતિ ॥૬॥

### (સ્રગ્ધરાવૃત્તમ્)

બાહ્યેનાભ્યન્તરેણ, પ્રથિતબહુભિદા, જીયતે યેન શત્રુ-
શ્રેણી બાહ્યાન્તરઙ્ગા, ભરતનૃપતિવદ્ ભાવલબ્ધદ્રઢિમ્ના ।
યસ્માત્ પ્રાદુર્ભવેયુઃ, પ્રકટિતવિભવા, લબ્ધયઃ સિદ્ધયશ્ચ,
વન્દે સ્વર્ગાપવર્ગા-ર્પણપટુ સતતં, તત્તપો વિશ્વવન્દ્યમ્ ॥૭॥

### (નવમભાવનાગેયાષ્ટકમ્-સારંગ-રાગ)

વિભાવય વિનય તપોમહિમાનં, વિભાવય વિનયતપોમહિમાનમ્
બહુભવસઞ્ચિતદુષ્કૃતમમુના, લભતે લઘુ લઘિમાનમ્ ॥૧॥

યાતિ ઘનાઽપિ ઘનાઘનપટલી, ખરપવનેન વિરામમ્ ।
ભજતિ તથા તપસા દુરિતાલી, ક્ષણભઙ્ગુરપરિણામમ્ ॥૨॥
વાઞ્છિતમાકર્ષતિ દૂરાદપિ, રિપુમપિ વ્રજતિ વયસ્યમ્ ।
તપ ઇદમાશ્રય નિર્મલભાવા-દાગમપરમરહસ્યમ્ ॥૩॥
અનશનમૂનોદરતાં વૃત્તિ-હ્રાસં રસપરિહારમ્ ।
ભજ સાંલીન્યં કાયક્લેશં, તપ ઇતિ બાહ્યમુદારમ્ ॥૪॥
પ્રાયશ્ચિત્તં વૈયાવૃત્ત્યં, સ્વાધ્યાયં વિનયં ચ ।
કાયોત્સર્ગં શુભધ્યાન-, માભ્યન્તર-મિદમઞ્ચ ॥૫॥
શમયતિ તાપં ગમયતિ પાપં, રમયતિ માનસહંસમ્ ।
હરતિ વિમોહં દૂરારોહં, તપ ઇતિ વિગતાશંસમ્ ॥૬॥
સંયમકમલાકાર્મણમુજ્જ્વલ-શિવસુખસત્યઙ્કારમ્ ।
ચિન્તિતચિન્તામણિમારાધય, તપ ઈહ વારંવારમ્ ॥૭॥
કર્મગદૌષધમિદમિદમસ્ય ચ, જિનપતિમતમનુપાનમ્ ।
વિનય સમાચર સૌખ્યનિધાનં, શાન્તસુધારસપાનમ્ ॥૮॥

ઇતિ નવમઃ પ્રકાશઃ

## ધર્મ સ્વાખ્યાત ભાવના

### (ઉપજાતિ વૃત્તમ્)

દાનં ચ શીલં ચ તપશ્ચ ભાવો,
ધર્મશ્ચતુર્ધા જિનબાન્ધવેન ।
નિરૂપિતો યો જગતાં હિતાય,
સ માનસે મે રમતામજસ્રમ્ ॥૧॥

### (ઇન્દ્રવજ્રાવૃત્તત્રયમ્)

સત્યક્ષમામાર્દવશૌચસઙ્ગ-
ત્યાગાઽઽર્જવબ્રહ્મવિમુક્તિયુક્તઃ ।
યઃ સંયમઃ કિં ચ તપોઽવગૂઢ-
શ્ચારિત્રધર્મો દશધાઽયમુક્તઃ ॥૨॥
યસ્ય પ્રભાવાદિહ પુષ્પદન્તૌ,
વિશ્વોપકારાય સદોદયેતે ।
ગ્રીષ્મોષ્મભીષ્મામુદિતસ્તડિત્વાન્,
કાલે સમાશ્વાસયતિ ક્ષિતિં ચ ॥૩॥
ઉલ્લોલકલ્લોલકલાવિલાસૈ-
ર્નાપ્લાવયત્યમ્બુનિધિઃ ક્ષિતિં યત્ ।
ન ઘ્નન્તિ યદ્ વ્યાઘ્રમરુદ્દવાદ્યા,
ધર્મસ્ય સર્વોઽપ્યનુભાવ એષઃ ॥૪॥

### (શાર્દૂલવિક્રીડિતં વૃત્તમ્)

યસ્મિનૈવ પિતા હિતાય યતતે, ભ્રાતા ચ માતા સુતઃ,
સૈન્યં દૈન્યમુપૈતિ ચાપચપલં, યત્રાઽફલં દોર્બલમ્ ।
તસ્મિન્ કષ્ટદશાવિપાકસમયે, ધર્મસ્તુ સંવર્મિતઃ,
સજ્જઃ સજ્જન એષ સર્વજગત-સ્ત્રાણાય બદ્ધોદ્યમઃ ॥૫॥
ત્રૈલોક્યં સચરાચરં વિજયતે, યસ્ય પ્રસાદાદિદં,
યોઽત્રા-ઽમુત્ર હિતાવહસ્તનુભૃતાં, સર્વાર્થસિદ્ધિપ્રદઃ ।
યેનાનર્થકદર્થના નિજમહઃસામર્થ્યતો વ્યર્થિતા,
તસ્મૈ કારુણિકાય ધર્મવિભવે, ભક્તિપ્રણામોઽસ્તુ મે ॥૬॥

### (મન્દાક્રાન્તા વૃત્તમ્)

પ્રાજ્યં રાજ્યં સુભગદયિતા નન્દના નન્દનાનાં,

રમ્યં રૂપં સરસકવિતાચાતુરી સુસ્વરત્વમ્ ।
નીરોગત્વં ગુણપરિચયઃ, સજ્જનત્વં સુબુદ્ધિં,
કિંનુ બ્રૂમઃ ફલપરિણતિં, ધર્મકલ્પદ્રુમસ્ય ॥૭॥

**(દશમભાવનાગેયાષ્ટકમ્ વસન્ત-રાગ)**

પાલય પાલય રે પાલય માં જિનધર્મ,
મઙ્ગલકમલાકેલિનિકેતન, કરુણાકેતન ધીર;
શિવસુખસાધન, ભવભયબાધન, જગદાધાર ગંભીર ॥૧॥
સિઞ્ચતિ પયસા જલધરપટલી, ભૂતલમમૃતમયેન
સૂર્યાચન્દ્રમસાવુદયેતે, તવ મહિમાતિશયેન ॥૨॥
નિરાલમ્બમિયમસદાધારા, તિષ્ઠતિ વસુધા યેન ।
તં વિશ્વસ્થિતિમૂલસ્તમ્ભં, ત્વાં સેવે વિનયેન ॥૩॥
દાનશીલશુભભાવતપોમુખ-ચરિતાર્થીકૃતલોકઃ ।
શરણસ્મરણકૃતામિહ ભવિનાં, દૂરીકૃતભયશોકઃ ॥૪॥
ક્ષમાસત્યસન્તોષદયાદિક-સુભગસકલપરિવારઃ ।
દેવાસુરનરપૂજિતશાસન-કૃતબહુભવપરિહારઃ ॥૫॥
બન્ધુરબન્ધુજનસ્ય દિવાનિશ-મસહાયસ્ય સહાય ।
ભ્રામ્યતિ ભીમે ભવગહનેઽઙ્ગી, ત્વાં બાન્ધવમપહાય ॥૬॥
દ્રઙ્ગતિ ગહનં જલતિ કૃશાનુઃ, સ્થલતિ જલધિરચિરેણ ।
તવ કૃપયાખિલકામિતસિદ્ધિ-ર્બહુના કિં નુ પરેણ? ॥૭॥
ઇહ યચ્છસિ સુખમુદિતદશાઙ્ગં, પ્રેત્યેન્દ્રાદિપદાનિ ।
ક્રમતો જ્ઞાનાદીનિ ચ વિતરસિ, નિઃશ્રેયસસુખદાનિ ॥૮॥
સર્વતન્ત્રનવનીત સનાતન, સિદ્ધિસદનસોપાન ।
જય જય વિનયવતાં પ્રતિલમ્ભિત-શાન્તસુધારસપાન ॥૯॥

ઇતિ દશમઃ પ્રકાશઃ

## લોક સ્વરૂપ ભાવના
### (શાલિનીવૃત્તમ્)

સપ્તાધોઽધો વિસ્તૃતા યાઃ પૃથિવ્ય-
શ્છત્રાકારાઃ સન્તિ રત્નપ્રભાદ્યાઃ ।
તાભિઃ પૂર્ણો યો-ઽસ્ત્યધોલોક એતૌ,
પાદૌ યસ્ય વ્યાયતૌ સપ્તરજ્જૂ ॥૧॥
તિર્યગ્લોકો વિસ્તૃતો રજ્જુમેકાં,
પૂર્ણો દ્વીપૈરર્ણવાન્તૈરસંખ્યૈઃ ।
યસ્ય જ્યોતિશ્ચક્રકાઞ્ચીકલાપં,
મધ્યે કાર્શ્યં શ્રીવિચિત્રં કટિત્રમ્ ॥૨॥
લોકોઽથોર્ધ્વે બ્રહ્મલોકે દ્યુલોકે,
યસ્ય વ્યાપ્તૌ કૂર્પરો પઞ્ચરજ્જૂ ।
લોકસ્યાઽન્તો વિસ્તૃતો રજ્જુમેકાં,
સિદ્ધજ્યોતિશ્ચિત્રકો યસ્ય મૌલિઃ ॥૩॥
યો વૈશાખસ્થાનકસ્થાયિપાદઃ,
શ્રોણીદેશે ન્યસ્તહસ્તદ્વયશ્ચ ।
કાલેઽનાદૌ શશ્વદૂર્ધ્વં દમત્વાદ્,
બિભ્રાણોઽપિ શ્રાન્તમુદ્રામખિન્નઃ ॥૪॥
સોઽયં જ્ઞેયઃ પૂરુષો લોકનામા,
ષડ્દ્રવ્યાત્માઽકૃત્રિમોઽનાદ્યનન્તઃ ।

ધર્માધર્માકાશકાલાત્મસંજ્ઞૈ-
ર્દ્રવ્યૈઃ પૂર્ણઃ સર્વતઃ પુદ્ગલૈશ્ચ ॥૫॥
રङ્ગસ્થાનં પુદ્ગલાનાં નટાનાં,
નાનારૂપૈર્નૃત્યતામાત્મનાં ચ ।
કાલોદ્યોગસ્વસ્વભાવાદિભાવૈઃ,
કર્માતોદ્યૈર્નર્તિતાનાં નિયત્યા ॥૬॥
એવં લોકો ભાવ્યમાનો વિવિક્ત્યા,
વિજ્ઞાનાં સ્યાન્ માનસસ્થૈર્યહેતુઃ ।
સ્થૈર્યં પ્રાપ્તે માનસે ચાત્મનીના,
સુપ્રાપ્યૈવાધ્યાત્મસૌખ્યપ્રસૂતિઃ ॥૭॥

## (એકાદશભાવનાગેયાષ્ટકમ્ કાફી-રાગ)

વિનય વિભાવય શાશ્વતં, હૃદિ લોકાકાશમ્ ।
સકલચરાચરધારણે, પરિણમદવકાશમ્. વિનય૦ ॥૧॥
લસદલોકપરિવેષ્ટિતં, ગણનાતિગમાનમ્ ।
પઞ્ચભિરપિ ધર્માદિભિઃ સુઘટિતસીમાનમ્. વિનય૦ ॥૨॥
સમવઘાતસમયે જિનૈઃ, પરિપૂરિતદેહમ્ ।
અસુમદણુકવિવિધક્રિયા-ગુણગૌરવગેહમ્. વિનય૦ ॥૩॥
એકરૂપમપિ પુદ્ગલૈઃ, કૃતવિવિધવિવર્તમ્ ।
કાઞ્ચનશૈલશિખરોન્નતં, ક્વચિદવનતગર્તમ્. વિનય૦ ॥૪॥
ક્વચન તવિષમણિમન્દિરૈ-રુદિતોદિતરૂપમ્ ।
ઘોરતિમિરનરકાદિભિઃ, ક્વચનાતિવિરૂપમ્. વિનય૦ ॥૫॥
ક્વચિદુત્સવમયમુજ્જ્વલં, જયમङ્ગલનાદમ્ ।
ક્વચિદમન્દહાહારવં, પૃથુશોકવિષાદમ્. વિનય૦ ॥૬॥
બહુપરિચિતમનન્તશો, નિખિલૈરપિ સત્ત્વૈઃ ।
જન્મમરણપરિવર્તિભિઃ, કૃતમુક્તમમત્વૈઃ. વિનય૦ ॥૭॥
ઇહ પર્યટનપરાङ્મુખાઃ, પ્રણમત ભગવન્તમ્ ।
શાન્તસુધારસપાનતો, ધૃતવિનયમવન્તમ્. વિનય૦ ॥૮॥

ઇતિ એકાદશઃ પ્રકાશઃ

## બોધિ દુર્લભ ભાવના

## (મન્દાકાન્તા વૃત્તમ્)

યસ્માદ્વિસ્મા-પયિતસુમનઃ-સ્વર્ગસમ્પદ્વિલાસ-
પ્રાપ્તોલ્લાસાઃ, પુનરપિ જનિઃ, સત્કુલે ભૂરિભોગે ।
બ્રહ્માદ્વૈત-પ્રગુણપદવી-પ્રાપકં નિઃસપત્નં;
તદ્ દુષ્પ્રાપં, ભૃશમુરુધિયઃ, સેવ્યતાં બોધિરત્નમ્ ॥૧॥

## (ભુજङ્ગપ્રયાતવૃત્તત્રયમ્)

અનાદૌ નિગોદાન્ધકૂપે સ્થિતાના-
મજસ્રં જનુર્મૃત્યુદુઃખાર્દિતાનામ્ ।
પરીણામશુદ્ધિઃ કુતસ્તાદૃશી સ્યાદ્
યયા હન્ત તસ્માદ્વિનિર્યાન્તિ જીવાઃ ॥૨॥
તતો નિર્ગતાનામપિ સ્થાવરત્વં,
ત્રસત્વં પુનર્દુર્લભં દેહભાજામ્ ।
ત્રસત્વેऽપિ પઞ્ચાક્ષપર્યાપ્તસંજ્ઞિ-
સ્થિરાયુષ્યવદ્દુર્લભં માનુષત્વમ્ ॥૩॥
તદેતન્મનુષ્યત્વમાપ્યાપિ મૂઢો,
મહામોહમિથ્યાત્વમાયોપગૂઢઃ ।

ભ્રમન્ દૂરમગ્નો ભવાગાધગર્તે,
પુનઃ ક્વ પ્રપદ્યેત તદ્‌બોધિરત્નમ્ ।।૪।।

**(શિખરિણી વૃત્તમ્)**

વિભિન્નાઃ પન્થાનઃ, પ્રતિપદમનલ્પાશ્ચ મતિનઃ,
કુયુક્તિવ્યાસઙ્ગૈ-ર્નિજનિજમતોલ્લાસરસિકાઃ ।
ન દેવાઃ સાંનિધ્યં, વિદધતિ નવા કોઽપ્યતિશય-
સ્તદેવં કાલેઽસ્મિન્, ય ઇહ દૃઢધર્મા સ સુકૃતી ।।૫।।

**(શાર્દૂલવિક્રીડિતં વૃત્તમ્)**

યાવદ્‌દેહમિદં ગદૈર્ન મૃદિતં, નો વા જરાજર્જરં,
યાવત્ત્વક્ષકદમ્બકં સ્વવિષય-જ્ઞાનાવગાહક્ષમમ્ ।
યાવચ્ચાયુરભઙ્ગુરં નિજહિતે, તાવદ્‌બુધૈર્યત્યતાં;
કાસારે સ્ફુટિતે જલે પ્રચલિતે, પાલિઃ કથં બધ્યતે ।।૬।।

**(અનુષ્ટુબ્‌વૃત્તમ્)**

વિવિધોપદ્રવં દેહ-માયુશ્ચ ક્ષણભઙ્ગુરમ્ ।
કામાલમ્બ્ય ધૃતિં મૂઢૈઃ, સ્વશ્રેયસિ વિલમ્બ્યતે ।।૭।।

**(દ્વાદશભાવનાગેયાષ્ટકમ્ ધનશ્રી-રાગ)**

બુધ્યતાં બુધ્યતાં બોધિરતિદુર્લભા,
જલધિજલપતિતસુરરત્નયુક્ત્યા
સમ્યગારાધ્યતાં સ્વહિતમિહ સાધ્યતાં,
બાધ્યતામધરગતિરાત્મશક્ત્યા ।।૧।।
ચક્રિભોજ્યાદિરિવ નરભવો દુર્લભો,
ભ્રામ્યતાં ઘોરસંસારકક્ષે ।
બહુનિગોદાદિકાયસ્થિતિવ્યાયતે,
મોહમિથ્યાત્વમુખચોરલક્ષે ।।૨।।
લબ્ધ ઇહ નરભવોઽનાર્યદેશેષુ યઃ,
સ ભવતિ પ્રત્યુતાનર્થકારી
જીવહિંસાદિપાપાશ્રવવ્યસનિનાં,
માઘવત્યાદિમાર્ગાનુસારી ।।૩।।
આર્યદેશસ્પૃશામપિ સુકુલજન્મનાં,
દુર્લભા વિવિદિષા ધર્મતત્ત્વે
રતપરિગ્રહભયાહારસંજ્ઞાર્તિભિ-
ર્હન્ત મગ્નં જગદ્‌દુઃસ્થિતત્વે ।।૪।।
વિવિદિષાયામપિ શ્રવણમતિદુર્લભં,
ધર્મશાસ્ત્રસ્ય ગુરુસન્નિધાને
વિતથવિકથાદિતત્તદ્રસાવેશતો,
વિવિધવિક્ષેપમલિનેઽવધાને ।।૫।।
ધર્મમાકર્ણ્ય સમ્બુધ્ય તત્રોદ્યમં,
કુર્વતો વૈરિવર્ગોઽન્તરઙ્ગઃ ।
રાગદ્વેષશ્રમાલસ્યનિદ્રાદિકો,
બાધતે નિહતસુકૃતપ્રસઙ્ગઃ ।।૬।।
ચતુરશીતાવહો યોનિલક્ષેષ્વિયં,
ક્વ ત્વયાકર્ણિતા ધર્મવાર્તા ।
પ્રાયશો જગતિ જનતા મિથો વિવદતે,
ઋદ્ધિરસશાતગુરુગૌરવાર્તાઃ ।।૭।।
એવમતિદુર્લભાત્ પ્રાપ્ય દુર્લભતમં,

બોધિરત્નં સકલગુણનિધાનમ્
કુરુ ગુરુપ્રાજ્યવિનયપ્રસાદોદિતં,
શાન્તરસસરસપીયૂષપાનમ્ ॥૮॥

ઇતિ દ્વાદશઃ પ્રકાશઃ

## મૈત્રી ભાવના

### (અનુષ્ટુબ્વૃત્તદ્વયમ્)

સદ્ધર્મધ્યાનસંધ્યાન-હેતવઃ શ્રીજિનેશ્વરૈઃ ।
મૈત્રીપ્રભૃતયઃ પ્રોક્તા-શ્ચતસ્રો ભાવનાઃ પરાઃ ॥૧॥
તથાહુઃ-મૈત્રીપ્રમોદકારુણ્ય-માધ્યસ્થ્યાનિ નિયોજયેત્ ।
ધર્મધ્યાનમુપસ્કર્તું, તદ્ધિ તસ્ય રસાયનમ્ ॥૨॥

### (ઉપજાતિ વૃત્તાનિ)

મૈત્રી પરેષાં હિતચિન્તનં યદ્
ભવેત્ પ્રમોદો ગુણપક્ષપાતઃ ।
કારુણ્યમાર્તાઙ્ગિરુજાં જિહીર્ષે-
ત્યુપેક્ષણં દુષ્ટધિયામુપેક્ષા ॥૩॥
સર્વત્ર મૈત્રીમુપકલ્પયાત્મન્!,
ચિન્ત્યો જગત્યત્ર ન કોઽપિ શત્રુઃ ।
કિયદ્દિનસ્થાયિનિ જીવિતેઽસ્મિન્,
કિં ખિદ્યતે વૈરિધિયા પરસ્મિન્ ॥૪॥
સર્વેઽપ્યમી બન્ધુતયાનુભૂતાઃ,
સહસ્રશોઽસ્મિન્ ભવતા ભવાબ્ધૌ ।
જીવાસ્તતો બન્ધવ એવ સર્વે,
ન કોઽપિ તે શત્રુરિતિ પ્રતીહિ ॥૫॥
સર્વે પિતૃભ્રાતૃપિતૃવ્યમાતૃ-
પુત્રાઙ્ગજાસ્ત્રીભગિનીસ્નુષાત્વમ્ ।
જીવાઃ પ્રપન્ના બહુશસ્તદેતત્,
કુટુમ્બમેવેતિ પરો ન કશ્ચિત્ ॥૬॥

### (ઇન્દ્રવજ્રાવૃત્તદ્વયમ્)

એકેન્દ્રિયાદ્યા અપિ હન્ત જીવાઃ,
પઞ્ચેન્દ્રિયત્વાદ્યધિગમ્ય સમ્યક્ ।
બોધિં સમારાધ્ય કદા લભન્તે,
ભૂયો ભવભ્રાન્તિભિયાં વિરામમ્ ॥૭॥
યા રાગરોષાદિરુજો જનાનાં,
શામ્યન્તુ વાક્કાયમનોદ્રુહસ્તાઃ ।
સર્વે-ઽપ્યુદાસીનરસં રસન્તુ,
સર્વત્ર સર્વે સુખિનો ભવન્તુ ॥૮॥

### (ત્રયોદશભાવનાગેયાષ્ટકમ્ દેશાખ-રાગ)

વિનય વિચિન્તય મિત્રતાં, ત્રિજગતિ જનતાસુ ।
કર્મવિચિત્રતયા ગતિં, વિવિધાં ગમિતાસુ. વિ૦ ॥૧॥
સર્વે તે પ્રિયબાન્ધવા, ન હિ રિપુરિહ કોઽપિ ।
મા કુરુ કલિકલુષં મનો, નિજસુકૃતવિલોપિ. વિ૦ ॥૨॥
યદિ કોપં કુરુતે પરો, નિજ-કર્મવશેન ।
અપિ ભવતા કિં ભૂયતે હૃદિ રોષવશેન. વિ૦ ॥૩॥
અનુચિતમિહ કલહં સતાં, ત્યજ સમરસમીન ।
ભજ વિવેકકલહંસતાં, ગુણપરિચયપીન. વિ૦ ॥૪॥

શત્રુજનાઃ સુખિનઃ સમે, મત્સરમપહાય ।
સન્તુ ગન્તુમનસો-ઽપ્યમી, શિવસૌખ્યગૃહાય. વિ૦ ॥૫॥
સકૃદપિ યદિ સમતાલવં, હૃદયેન લિહન્તિ ।
વિદિતરસાસ્તત ઇહ રતિં, સ્વત એવ વહન્તિ. વિ૦ ॥૬॥
કિમુત કુમતમદમૂર્છિતા, દુરિતેષુ પતન્તિ ।
જિનવચનાનિ કથં હહા, ન રસાદુપયન્તિ. વિ૦ ॥૭॥
પરમાત્મનિ વિમલાત્મનાં, પરિણમ્ય વસન્તુ ।
વિનય સમામૃતપાનતો, જનતા વિલસન્તુ. વિ૦ ॥૮॥

ઇતિ ત્રયોદશઃ પ્રકાશઃ

## પ્રમોદ ભાવના

### (સ્રગ્ધરાવૃત્તચતુષ્ટયમ્)

ધન્યાસ્તે વીતરાગાઃ, ક્ષપકપથગતિ-ક્ષીણકર્મોપરાગા-
સ્ત્રૈલોક્યે ગન્ધનાગાઃ, સહજસમુદિતજ્ઞાનજાગ્રદ્વિરાગાઃ ।
અધ્યારુહ્યાત્મશુદ્ધ્યા, સકલશશિકલાનિર્મલધ્યાનધારા-
મારાન્મુક્તેઃ પ્રપન્નાઃ, કૃતસુકૃત-શતો-પર્જિતાર્હન્ત્યલક્ષ્મીમ્ ॥૧॥
તેષાં કર્મક્ષયોત્થૈ-રતનુ-ગુણગણૈ-ર્નિર્મલાત્મસ્વભાવૈ-
ર્ગાયં ગાયં પુનીમઃ, સ્તવનપરિણતૈ-રષ્ટવર્ણાસ્પદાનિ ।
ધન્યાં મન્યે રસજ્ઞાં, જગતિ ભગવતઃ, સ્તોત્રવાણીરસજ્ઞા-
મજ્ઞાં મન્યે તદન્યાં, વિતથજનકથા- કાર્યમૌખર્યમગ્નામ્ ॥૨॥
નિર્ગ્રન્થાસ્તેઽપિ ધન્યા, ગિરિગહનગુહા-ગહ્વરાન્તર્નિવિષ્ટા,
ધર્મધ્યાનાવધાનાઃ, સમરસસુહિતાઃ, પક્ષમાસોપવાસાઃ ।
યેઽન્યેઽપિ જ્ઞાનવન્તઃ, શ્રુતવિતતધિયો, દત્તધર્મોપદેશાઃ,
શાન્તા દાન્તા જિતાક્ષા, જગતિ જિનપતેઃ, શાસનં ભાસયન્તિ ॥૩॥
દાનં શીલં તપો યે વિદધતિ ગૃહિણો, ભાવનાં ભાવયન્તિ,
ધર્મં ધન્યાશ્ચતુર્ધા, શ્રુતસમુપચિત-શ્રદ્ધયારાધયન્તિ ।
સાધ્વ્યઃ શ્રાદ્ધ્યશ્ચ ધન્યાઃ શ્રુતવિશદધિયા,
શીલમુદ્ભાવયન્ત્ય-સ્તાન્ સર્વાન્ મુક્તગર્વાઃ, પ્રતિદિનમસકૃદ્, ભાગ્યભાજઃ સ્તુવન્તિ ॥૪॥

### (ઉપજાતિ વૃત્તમ્)

મિથ્યાદૃશામપ્યુપકારસારં, સંતોષસત્યાદિગુણપ્રસારમ્ ।
વદાન્યતા-વૈનયિકપ્રકારં, માર્ગાનુસારીત્યનુમોદયામઃ ॥૫॥

### (સ્રગ્ધરાવૃત્તમ્)

જિહ્વે પ્રહ્વીભવ ત્વં, સુકૃતિસુચરિતો-ચ્ચારણે સુપ્રસન્ના,
ભૂયાસ્તામન્યકીર્તિ-શ્રુતિરસિકતયા, મેઽદ્ય કર્ણૌ સુકર્ણૌ ।
વીક્ષ્યાન્યપ્રૌઢલક્ષ્મીં, દ્રુતમુપચિનુતં, લોચને રોચનત્વં,
સંસારેઽસ્મિન્નસારે, ફલમિતિ ભવતાં, જન્મનો મુખ્યમેવ ॥૬॥

### (ઉપજાતિ વૃત્તમ્)

પ્રમોદમાસાદ્ય ગુણૈઃ પરેષાં, યેષાં મતિર્મજ્જતિ સામ્યસિન્ધૌ;
દેદીપ્યતે તેષુ મનઃપ્રસાદો, ગુણાસ્તથૈતે વિશદીભવન્તિ ॥૭॥

### (ચતુર્દશભાવનાગેયાષ્ટકમ્ ટોડી-રાગ)

વિનય વિભાવય ગુણપરિતોષં
વિનય વિભાવય ગુણપરિતોષમ્
નિજસુકૃતાપ્તવરેષુ પરેષુ,
પરિહર દૂરં મત્સરદોષમ્ ॥૧॥
દિષ્ટ્યાયં વિતરતિ બહુદાનં,
વરમયમિહ લભતે બહુમાનમ્ ।

કિમિતિ વિમૃશસિ પરપરભાગં,
યદ્વિભજસિ તત્સુકૃતવિભાગમ્ ॥૨॥
યેષાં મન ઇહ વિગતવિકારં,
યે વિદધતિ ભુવિ જગદુપકારમ્
તેષાં વયમુચિતાચરિતાનાં,
નામ જપામો વારંવારમ્ ॥૩॥
અહહ તિતિક્ષાગુણમસમાનં,
પશ્યત ભગવતિ મુક્તિનિદાનમ્
યેન રુષા સહ લસદભિમાનં,
ઝટિતિ વિઘટતે કર્મવિતાનમ્ ॥૪॥
અદધુઃ કેચન શીલમુદારં,
ગૃહિણોઽપિ પરિહૃતપરદારમ્ ।
યશ ઇહ સમ્પ્રત્યપિ શુચિ તેષાં,
વિલસતિ ફલિતાફલસહકારમ્ ॥૫॥
યા વનિતા અપિ યશસા સાકં,
કુલયુગલં વિદધતિ સુપતાકમ્
તાસાં સુચરિતસઞ્ચિતરાકં,
દર્શનમપિ કૃતસુકૃતવિપાકમ્ ॥૬॥
તાત્ત્વિકસાત્ત્વિકસુજનવતંસાઃ,
કેચન યુક્તિવિવેચનહંસાઃ ।
અલમકૃષત કિલ ભુવનાભોગં,
સ્મરણમમીષાં કૃતશુભયોગમ્ ॥૭॥
ઇતિ પરગુણપરિભાવનસારં,
સફલય સતતં નિજમવતારમ્ ।
કુરુ સુવિહિતગુણનિધિગુણગાનં,
વિરચય શાન્તસુધારસપાનમ્ ॥૮॥

ઇતિ ચતુર્દશઃ પ્રકાશઃ

## કરૂણા ભાવના

### (માલિની વૃત્તમ્)

પ્રથમમશનપાનપ્રાપ્તિવાચ્છાવિહસ્તા-
સ્તદનુ વસનવેશ્માલઙ્કૃતિવ્યગ્રચિત્તાઃ ।
પરિણયનમપત્યાવાપ્તિમિષ્ટેન્દ્રિયાર્થાન્,
સતતમભિલષન્તઃ સ્વસ્થતાં ક્વાઽશ્નુવીરન્ ॥૧॥

### (શિખરિણી વૃત્તમ્)

ઉપાયાનાં લક્ષૈઃ, કથમપિ સમાસાદ્ય વિભવં,
ભવાભ્યાસાત્તત્ર, ધ્રુવમિતિ નિબધ્નાતિ હૃદયમ્ ।
અથાકસ્માદસ્મિન્, વિકિરતિ રજઃ ક્રૂરહૃદયો,
રિપુર્વા રોગો વા ભયમુત જરા મૃત્યુરથવા ॥૨॥

### (સ્રગ્ધરાવૃત્તમ્)

સ્પર્ધન્તે કેઽપિ કેચિદ્દધતિ હૃદિ મિથો, મત્સરં ક્રોધદગ્ધા,
યુધ્યન્તે કેઽપ્યરુદ્ધા ધનયુવતિપશુ-ક્ષેત્રપદ્રાદિહેતોઃ ।
કેચિલ્લોભાલ્લભન્તે, વિપદમનુપદં, દૂરદેશાનટન્તઃ,
કિં કુર્મઃ કિં વદામો, ભૃશમરતિશતૈ-ર્વ્યાકુલં વિશ્વમેતત્ ॥૩॥

### (ઉપજાતિવૃત્તત્રયમ્)

સ્વયં ખનન્તઃ સ્વકરેણ ગર્તાં, મધ્યે સ્વયં તત્ર તથા પતન્તિ
યથા તતો નિષ્ક્રમણં તુ દૂરેડ-ધોડધઃપ્રપાતાદ્વિરમન્તિ નૈવ ॥૪॥
પ્રકલ્પયન્નાસ્તિકતાદિવાદ-મેવં પ્રમાદં પરિશીલયન્તઃ ।
મગ્ના નિગોદાદિષુ દોષદગ્ધા, દુરન્તદુઃખાનિ હહા સહન્તે ॥૫॥
શ્રુણ્વન્તિ યે નૈવ હિતોપદેશં, ન ધર્મલેશં મનસા સ્પૃશન્તિ ।
રુજઃ કથઙ્કારમથાપનેયા-સ્તેષામુપાયસ્ત્વયમેક એવ ॥૬॥

**(અનુષ્ટુબ્વૃત્તમ્)**

પરદુઃખપ્રતીકાર-મેવં ધ્યાયન્તિ યે હૃદિ ।
લભન્તે નિર્વિકારં તે, સુખમાયતિસુન્દરમ્ ॥૭॥

**(પઞ્ચદશભાવનાગેયાષ્ટકમ્ રામકુલિ-રાગ)**

સુજના ભજત મુદા ભગવન્તં, સુજના ભજત મુદા ભગવન્તમ્
શરણાગતજનમિહ નિષ્કારણ-કરુણાવન્તમવન્તં રે ॥૧॥
ક્ષણમુપધાય મનઃસ્થિરતાયાં, પિબત જિનાગમસારમ્ ।
કાપથઘટનાવિકૃતવિચારં, ત્યજત કૃતાન્તમસારં રે ॥૨॥
પરિહરણીયો ગુરુરવિવેકી, ભ્રમયતિ યો મતિમન્દમ્ ।
સુગુરુવચઃ સુકૃદપિ પરિપીતં, પ્રથયતિ પરમાનન્દં રે ॥૩॥
કુમતતમોભરમીલિતનયનં, કિમુ પૃચ્છત પન્થાનમ્ ।
દધિબુદ્ધ્યા નર જલમન્થન્યાં, કિમુ નિદધત મન્થાનં રે ॥૪॥
અનિરુદ્ધં મન એવ જનાનાં, જનયતિ વિવિધાતઙ્કમ્ ।
સપદિ સુખાનિ તદેવ વિધત્તે, આત્મારામમશઙ્કં રે ॥૫॥
પરિહરતાશ્રવ વિકથાગૌરવ-મદનમનાદિવયસ્યમ્ ।
ક્રિયતાં સાંવરસાપ્તપદીનં, ધ્રુવમિદમેવ રહસ્યં રે ॥૬॥
સહ્યત ઇહ કિં ભવકાન્તારે, ગદનિકુરમ્બમપારમ્ ।
અનુસરતાડડહિતજગદુપકારં, જિનપતિમગદઙ્કારં રે ॥૭॥
શૃણુતૈકં વિનયોદિતવચનં, નિયતાયતિહિતરચનમ્ ।
રચયત કૃતસુખશતસન્ધાનં, શાન્તસુધારસપાનં રે ॥૮॥

ઇતિ પઞ્ચદશઃ પ્રકાશઃ

**માધ્યસ્થ્ય ભાવના**

**(પઞ્ચાપિ શાલિનીવૃત્તાનિ)**

શ્રાન્તા યસ્મિન્ વિશ્રમં સંશ્રયન્તે,
રુગ્ણાઃ પ્રીતિં યત્સમાસાદ્ય સદ્યઃ ।
લભ્યં રાગદ્વેષવિદ્વેષિરોધા-
દૌદાસીન્યં સર્વદા તત્ પ્રિયં નઃ ॥૧॥
લોકે લોકા ભિન્નભિન્નસ્વરૂપાઃ,
ભિન્નૈર્ભિન્નૈઃ કર્મભિર્મર્મભિદ્ભિઃ ।
રમ્યારમ્યૈશ્ચેષ્ટિતૈઃ કસ્ય કસ્ય,
તદ્વિદ્વદ્ભિઃ સ્તૂયતે રુષ્યતે વા ॥૨॥
મિથ્યા શંસન્ વીરતીર્થેશ્વરેણ
રોદ્ધું શેકે ન સ્વશિષ્યો જમાલિઃ ।
અન્યઃ કો વા રોત્સ્યતે કેન પાપાત્,
તસ્માદૌદાસીન્યમેવાત્મનીનમ્ ॥૩॥

અર્હન્તોઽપિ પ્રાજ્યશક્તિસ્પૃશઃ કિં,
ધર્મોદ્યોગં કારયેયુઃ પ્રસહ્ય ।
દદ્યુઃ શુદ્ધં કિન્તુ ધર્મોપદેશં,
યત્કુર્વાણા દુસ્તરં નિસ્તરન્તિ ॥૪॥
તસ્માદૌદાસીન્યપીયૂષસારં,
વારં વારં હન્ત સન્તો લિહન્તુ ।
આનન્દાનામુત્તરઙ્ગત્તરઙ્ગૈ-
ર્જીવદ્ભિર્યદ્ ભુજ્યતે મુક્તિસૌખ્યમ્ ॥૫॥

**(ષોડશભાવનાગેયાષ્ટકમ્-પ્રભાતિ-રાગ)**

અનુભવ વિનય! સદા સુખમનુભવ, ઔદાસીન્યમુદારં રે ।
કુશલસમાગમમાગમસારં, કામિતફલમન્દારં રે ॥૧॥
પરિહર પરચિન્તાપરિવારં, ચિન્તય નિજમવિકારં રે ।
તવ કિં કોઽપિ ચિનોતિ કરીરં, ચિનુતેઽન્યઃ સહકારં રે ॥૨॥
યોઽપિ ન સહતે હિતમુપદેશં, તદુપરિ મા કુરુ કોપં રે ।
નિષ્ફલયા કિં પરજનતપ્ત્યા, કુરુષે નિજસુખલોપં રે ॥૩॥
સૂત્રમપાસ્ય જડા ભાષન્તે, કેચન મતમુત્સૂત્રં રે ।
કિં કુર્મસ્તે પરિહૃતપયસો, યદિ પિબન્તિ મૂત્રં રે ॥૪॥
પશ્યસિ કિં ન મનઃપરિણામં, નિજનિજગત્યનુસારં રે ।
યેન જનેન યથા ભવિતવ્યં, તદ્ ભવતા દુર્વારં રે ॥૫॥
રમય હૃદા હૃદયઙ્ગમસમતાં, સંવૃણુ માયાજાલં રે ।
વૃથા વહસિ પુદ્ગલપરવશતા-માયુઃ પરિમિતકાલં રે ॥૬॥
અનુપમતીર્થમિદં સ્મર ચેતન-મન્તઃસ્થિતમભિરામં રે ।
વિરતિભાવવિશદપરિણામં, લભસે સુખમવિરામં રે ॥૭॥
પરબ્રહ્મપરિણામનિદાનં, સ્ફુટકેવલવિજ્ઞાનં રે ।
વિરચય વિનય! વિવેચિતજ્ઞાનં, શાન્તસુધારસપાનં રે ॥૮॥

ઇતિ ષોડશઃ પ્રકાશઃ

**(સ્રગ્ધરાવૃત્તદ્વયમ્)**

એવં સદ્ભાવનાભિઃ, સુરભિતહૃદયાઃ સંશયાતીતગીતો-
ન્નીતસ્ફીતાત્મતત્ત્વા-સ્ત્વરિતમપસરન્,-મોહનિદ્રામમત્વાઃ ।
ગત્વા સત્ત્વા મમત્વા-ઽતિશયમનુપમાં, ચક્રિશકાધિકાનાં;
સૌખ્યાનાં મઙ્ક્ષુ લક્ષ્મીં, પરિચિતવિનયાઃ સ્ફારકીર્તિં શ્રયન્તે॥૧॥
દુર્ધ્યાનપ્રેતપીડા, પ્રભવતિ ન મનાક્, કાચિદદ્વન્દ્વસૌખ્ય-
સ્ફાતિઃ પ્રીણાતિ ચિત્તં, પ્રસરતિ પરિતઃ, સૌખ્યસૌહિત્યસિન્ધુઃ
ક્ષીયન્તે રાગરોષપ્રભૃતિરિપુભટાઃ, સિદ્ધિસામ્રાજ્યલક્ષ્મીઃ,
સ્વાદ્વશ્યા યન્મહિમ્ના વિનયશુચિધિયો, ભાવનાસ્તાઃ શ્રયધ્વમ્ ॥૨॥

**(પથ્યાવૃત્તમ્)**

શ્રીહીરવિજયસૂરીશ્વરશિષ્યૌ, સોદરાવભૂતાં દ્વૌ ।
શ્રીસોમવિજયવાચક-વાચકવરકીર્તિવિજયાખ્યૌ ॥૩॥

**(ગીતિદ્વયમ્)**

તત્ર ચ- શ્રીકીર્તિવિજયવાચક-શિષ્યોપાધ્યાય વિનયવિજયેન ।
શાન્તસુધારસનામા, સંદૃબ્ધો ભાવનાપ્રબન્ધોઽયમ્ ॥૪॥
શિખિનયનસિન્ધુશશિમિત,-વર્ષે હર્ષેણ ગન્ધપુરનગરે ।
શ્રીવિજયપ્રભસૂરિ,-પ્રસાદતો યત્ન એષ સફલોઽભૂત્ ॥૫॥

## (ઉપજાતિ વૃત્તમ્)

યથા વિધુઃ ષોડશભિઃ કલાભિઃ, સમ્પૂર્ણતામેત્ય જગત્ પુનીતે
ગ્રન્થસ્તથા ષોડશભિઃ પ્રકાશૈ-રયં સમગ્રૈઃ શિવમાતનોતુ ॥૬॥

## (ઇન્દ્રવજ્રાવૃત્તમ્)

યાવજ્જગત્યેષ સહસ્રભાનુઃ, પીયૂષભાનુશ્ચ સદોદયેતે ।
તાવત્સતામેતદપિ પ્રમોદં, જ્યોતિઃસ્ફુરદ્વાઙ્મયમાતનોતુ ।

ઇતિ શ્રીશાન્તસુધારસનામા ભાવનાપ્રબંધઃ સમાપ્તઃ

# કલિકાલસર્વજ્ઞશ્રીહેમચન્દ્રાચાર્યરચિતમ્

# યોગશાસ્ત્રમ્

## પ્રથમઃ પ્રકાશઃ

નમો દુર્વારરાગાદિ,-વૈરિવારનિવારિણે ।
અર્હતે યોગિનાથાય, મહાવીરાય તાયિને ॥૧॥
પન્નગે ચ સુરેન્દ્રે ચ, કૌશિકે પાદસંસ્પૃશિ ।
નિર્વિશેષમનસ્કાય, શ્રીવીરસ્વામિને નમઃ ॥૨॥
કૃતાપરાધેઽપિ જને, કૃપામન્થરતારયોઃ ।
ઈષદ્બાષ્પાર્દ્રયોર્ભદ્રં, શ્રીવીરજિનનેત્રયોઃ ॥૩॥
શ્રુતામ્ભોધેરધિગમ્ય, સમ્પ્રદાયાચ્ચ સદ્ગુરોઃ ।
સ્વસંવેદનતશ્ચાપિ, યોગશાસ્ત્રં વિરચ્યતે ॥૪॥
યોગઃ સર્વવિપદ્વલ્લી-વિતાને પરશુઃ શિતઃ ।
અમૂલમન્ત્રતન્ત્રં ચ, કાર્મણં નિર્વૃતિશ્રિયઃ ॥૫॥
ભૂયાંસોઽપિ હિ પાપ્માનઃ, પ્રલયં યાન્તિ યોગતઃ ।
ચણ્ડવાતાદ્ ઘનઘના, ઘનાઘનઘટા ઇવ ॥૬॥
ક્ષિણોતિ યોગઃ પાપાનિ, ચિરકાલાર્જિતાન્યપિ ।
પ્રચિતાનિ યથૈધાંસિ, ક્ષણાદેવાશુશુક્ષણિઃ ॥૭॥
કફવિપ્રુણ્મલામર્શ-સર્વૌષધિમહર્દ્ધયઃ ।
સમ્ભિન્નસ્રોતોલબ્ધિશ્ચ, યૌગં તાણ્ડવડમ્બરમ્ ॥૮॥
ચારણાશીવિષાવધિ-, મનઃપર્યાયસમ્પદઃ ।
યોગકલ્પદ્રુમસ્યૈતા, વિકાસિકુસુમશ્રિયઃ ॥૯॥
અહો યોગસ્ય માહાત્મ્યં, પ્રાજ્યં સામ્રાજ્યમુદ્વહન્ ।
અવાપ કેવલજ્ઞાનં, ભરતો ભરતાધિપઃ ॥૧૦॥
પૂર્વમપ્રાપ્તધર્માઽપિ પરમાનન્દનન્દિતા ।
યોગપ્રભાવતઃ પ્રાપ, મરુદેવા પરં પદમ્ ॥૧૧॥
બ્રહ્મસ્ત્રીભ્રૂણગોઘાત-,પાતકાન્નરકાતિથેઃ ।
દૃઢપ્રહારિપ્રભૃતે-ર્યોગો હસ્તાવલમ્બનમ્ ॥૧૨॥
તત્કાલકૃતદુષ્કર્મ-કર્મઠસ્ય દુરાત્મનઃ ।
ગોપ્ત્રે ચિલાતિપુત્રસ્ય, યોગાય સ્પૃહયેન્ન કઃ? ॥૧૩॥
તસ્યાજનનિરેવાસ્તુ, નૃપશોર્મોઘજન્મનઃ ।
અવિદ્ધકર્ણો યો યોગ, ઇત્યક્ષરશલાકયા ॥૧૪॥
ચતુર્વર્ગેઽગ્રણીર્મોક્ષો, યોગસ્તસ્ય ચ કારણમ્ ।
જ્ઞાનશ્રદ્ધાનચારિત્ર-,રૂપં રત્નત્રયં ચ સઃ ॥૧૫॥
યથાવસ્થિતતત્ત્વાનાં, સંક્ષેપાદ્વિસ્તરેણ વા ।
યોઽવબોધસ્તમત્રાહુઃ, સમ્યગ્જ્ઞાનં મનીષિણઃ ॥૧૬॥
રુચિર્જિનોક્તતત્ત્વેષુ, સમ્યક્શ્રદ્ધાનમુચ્યતે ।
જાયતે તન્નિસર્ગેણ, ગુરોરધિગમેન વા ॥૧૭॥
સર્વસાવદ્યયોગાનાં, ત્યાગશ્ચારિત્રમિષ્યતે ।

કીર્તિતં તદહિંસાદિ-,વ્રતભેદેન પઞ્ચધા ॥૧૮॥
અહિંસાસૂનૃતાસ્તેય-, બ્રહ્મચર્યાપરિગ્રહાઃ ।
પઞ્ચભિઃ પઞ્ચભિર્યુક્તા, ભાવનાભિર્વિમુક્તયે ॥૧૯॥
ન યત્ પ્રમાદયોગેન, જીવિતવ્યપરોપણમ્ ।
ત્રસાનાં સ્થાવરાણાં ચ, તદહિંસાવ્રતં મતમ્ ॥૨૦॥
પ્રિયં પથ્યં વચસ્તથ્યં, સૂનૃતવ્રતમુચ્યતે ।
તત્તથ્યમપિ નો તથ્ય-મપ્રિયં ચાહિતં ચ યત્ ॥૨૧॥
અનાદાનમદત્તસ્યા, - સ્તેયવ્રતમુદીરિતમ્ ।
બાહ્યાઃ પ્રાણા નૃણામર્થો, હરતા તં હતા હિ તે ॥૨૨॥
દિવ્યૌદારિકકામાનાં, કૃતાનુમતિકારિતૈઃ ।
મનોવાક્કાયતસ્ત્યાગો, બ્રહ્માષ્ટાદશધા મતમ્ ॥૨૩॥
સર્વભાવેષુ મૂર્ચ્છાયા, -સ્ત્યાગઃ સ્યાદપરિગ્રહઃ ।
યદસત્સ્વપિ જાયેત, મૂર્ચ્છયા ચિત્તવિપ્લવઃ ॥૨૪॥
ભાવનાભિર્ભાવિતાનિ, પઞ્ચભિઃ પઞ્ચભિઃ ક્રમાત્ ।
મહાવ્રતાનિ નો કસ્ય, સાધયન્ત્યવ્યયં પદમ્ ॥૨૫॥
મનોગુપ્ત્યેષણાદાને, -ર્યાભિઃ સમિતિભિઃ સદા ।
દૃષ્ટાન્નપાનગ્રહણે, -નાહિંસાં ભાવયેત્ સુધીઃ ॥૨૬॥
હાસ્યલોભભયક્રોધ, -પ્રત્યાખ્યાનૈર્નિરન્તરમ્ ।
આલોચ્ય ભાષણેનાપિ, ભાવયેત્ સૂનૃતવ્રતમ્ ॥૨૭॥
આલોચ્યાવગ્રહયાચ્ઞા-ભીક્ષ્ણાવગ્રહયાચનમ્ ।
એતાવન્માત્રમેવૈત, -દિત્યવગ્રહધારણમ્ ॥૨૮॥
સમાનધાર્મિકેભ્યશ્ચ, તથાવગ્રહયાચનમ્ ।
અનુજ્ઞાપિતપાનાન્ના, -શનમસ્તેયભાવનાઃ ॥૨૯॥ યુગ્મમ્
સ્ત્રીષણ્ઢપશુમદ્વેશ્મા, -સનકુડ્યાન્તરોજ્ઝનાત્ ।
સરાગસ્ત્રીકથાત્યાગાત્, પ્રાગ્રતસ્મૃતિવર્જનાત્ ॥૩૦॥
સ્ત્રીરમ્યાઙ્ગેક્ષણસ્વાઙ્ગ-સંસ્કારપરિવર્જનાત્ ।
પ્રણીતાત્યશનત્યાગાદ્, બ્રહ્મચર્યં તુ ભાવયેત્ ॥૩૧॥ યુગ્મમ્
સ્પર્શે રસે ચ ગન્ધે ચ, રૂપે શબ્દે ચ હારિણિ ।
પઞ્ચસ્વિતીન્દ્રિયાર્થેષુ, ગાઢં ગાર્ધ્યસ્ય વર્જનમ્ ॥૩૨॥
એતેષ્વેવામનોજ્ઞેષુ, સર્વથા દ્વેષવર્જનમ્ ।
આકિઞ્ચન્યવ્રતસ્યૈવં, ભાવનાઃ પઞ્ચ કીર્ત્તિતાઃ ॥૩૩॥ યુગ્મમ્
અથવા પઞ્ચસમિતિ, -ગુપ્તિત્રયપવિત્રિતમ્ ।
ચરિત્રં સમ્યક્ચારિત્ર, -મિત્યાહુર્મુનિપુઙ્ગવાઃ ॥૩૪॥
ઈર્યાભાષૈષણાદાન, -નિક્ષેપોત્સર્ગસંજ્ઞિકાઃ ।
પઞ્ચાહુઃ સમિતીસ્તિસ્રો, ગુપ્તીસ્ત્રિયોગનિગ્રહાત્ ॥૩૫॥
લોકાતિવાહિતે માર્ગે, ચુમ્બિતે ભાસ્વદંશુભિઃ ।
જન્તુરક્ષાર્થમાલોક્ય, ગતિરીર્યા મતા સતામ્ ॥૩૬॥
અવદ્યત્યાગતઃ સર્વ, -જનીનં મિતભાષણમ્ ।
પ્રિયા વાચંયમાનાં સા, ભાષાસમિતિરુચ્યતે ॥૩૭॥
દ્વિચત્વારિંશતા ભિક્ષા, -દોષૈર્નિત્યમદૂષિતમ્ ।
મુનિર્યદન્નમાદત્તે, સૈષણાસમિતિર્મતા ॥૩૮॥
આસનાદીનિ સંવીક્ષ્ય, પ્રતિલિખ્ય ચ યત્નતઃ ।
ગૃહ્ણીયાન્નિક્ષિપેદ્વા યત્, સાદાનસમિતિઃ સ્મૃતા ॥૩૯॥
કફમૂત્રમલપ્રાયં, નિર્જન્તુજગતીતલે ।
યત્નાદ્યદુત્સૃજેત્ સાધુઃ, સોત્સર્ગસમિતિર્ભવેત્ ॥૪૦॥
વિમુક્તકલ્પનાજાલં, સમત્વે સુપ્રતિષ્ઠિતમ્ ।

આત્મારામં મનસ્તજ્જ્ઞૈ, -ર્મનોગુપ્તિરુદાહૃતા ॥૪૧॥
સંજ્ઞાદિપરિહારેણ, યન્મૌનસ્યાવલમ્બનમ્ ।
વાગ્વૃત્તેઃ સંવૃતિર્વા યા, સા વાગ્ગુપ્તિરિહોચ્યતે ॥૪૨॥
ઉપસર્ગ-પ્રસઙ્ગેઽપિ, કાયોત્સર્ગજુષો મુનેઃ ।
સ્થિરીભાવઃ શરીરસ્ય, કાયગુપ્તિર્નિગદ્યતે ॥૪૩॥
શયનાસનનિક્ષેપા, -દાનચઙ્ક્રમણેષુ યઃ ।
સ્થાનેષુ ચેષ્ટાનિયમઃ, કાયગુપ્તિસ્તુ સાઽપરા ॥૪૪॥
એતાશ્ચારિત્રગાત્રસ્ય, જનનાત્ પરિપાલનાત્ ।
સંશોધનાચ્ચ સાધૂનાં, માતરોઽષ્ટૌ પ્રકીર્ત્તિતાઃ ॥૪૫॥
સર્વાત્મના યતીન્દ્રાણા-, મેતચ્ચારિત્રમીરિતમ્ ।
યતિધર્માનુરક્તાનાં, દેશતઃ સ્યાદગારિણામ્ ॥૪૬॥
ન્યાયસમ્પન્નવિભવઃ, શિષ્ટાચારપ્રશંસકઃ ।
કુલશીલસમૈઃ સાર્દ્ધં, કૃતોદ્વાહોઽન્યગોત્રજૈઃ ॥૪૭॥
પાપભીરુઃ પ્રસિદ્ધં ચ, દેશાચારં સમાચરન્ ।
અવર્ણવાદી ન ક્વાપિ, રાજાદિષુ વિશેષતઃ ॥૪૮॥
અનતિવ્યક્તગુપ્તે ચ, સ્થાને સુપ્રાતિવેશ્મિકે ।
અનેકનિર્ગમદ્વાર-, વિવર્જિતનિકેતનઃ ॥૪૯॥
કૃતસઙ્ગઃ સદાચારૈ-, ર્માતાપિત્રોશ્ચ પૂજકઃ ।
ત્યજન્નુપપ્લુતં સ્થાન-, મપ્રવૃત્તશ્ચ ગર્હિતે ॥૫૦॥
વ્યયમાયોચિતં કુર્વન્, વેષં વિત્તાનુસારતઃ ।
અષ્ટભિર્ધીગુણૈર્યુક્તઃ, શૃણ્વાનો ધર્મમન્વહમ્ ॥૫૧॥
અજીર્ણે ભોજનત્યાગી, કાલે ભોક્તા ચ સાત્મ્યતઃ ।
અન્યોન્યાપ્રતિબન્ધેન, ત્રિવર્ગમપિ સાધયન્ ॥૫૨॥
યથાવદતિથૌ સાધૌ, દીને ચ પ્રતિપત્તિકૃત્ ।
સદાનભિનિવિષ્ટશ્ચ, પક્ષપાતી ગુણેષુ ચ ॥૫૩॥
અદેશકાલયોશ્ચર્યાં, ત્યજન્ જાનન્ બલાબલમ્ ।
વૃત્તસ્થજ્ઞાનવૃદ્ધાનાં, પૂજકઃ પોષ્યપોષકઃ ॥૫૪॥
દીર્ઘદર્શી વિશેષજ્ઞઃ, કૃતજ્ઞો લોકવલ્લભઃ ।
સલજ્જઃ સદયઃ સૌમ્યઃ, પરોપકૃતિકર્મઠઃ ॥૫૫॥
અન્તરઙ્ગારિષડ્વર્ગ-, પરિહારપરાયણઃ ।
વશીકૃતેન્દ્રિયગ્રામો, ગૃહિધર્માય કલ્પતે ॥૫૬॥

**(દશભિઃકુલકમ્)**

## દ્વિતીયઃ પ્રકાશઃ

સમ્યક્ત્વમૂલાનિ પઞ્ચા-, ણુવ્રતાનિ ગુણાસ્ત્રયઃ ।
શિક્ષાપદાનિ ચત્વારિ, વ્રતાનિ ગૃહમેધિનામ્ ॥૧॥
યા દેવે દેવતાબુદ્ધિ-, ર્ગુરૌ ચ ગુરુતામતિઃ ।
ધર્મ્મે ચ ધર્મ્મધીઃ શુદ્ધા, સમ્યક્ત્વમિદમુચ્યતે ॥૨॥
અદેવે દેવબુદ્ધિર્યા, ગુરુધીરગુરૌ ચ યા ।
અધર્મ્મે ધર્મ્મબુદ્ધિશ્ચ, મિથ્યાત્વં તદ્વિપર્યયાત્ ॥૩॥
સર્વજ્ઞો જિતરાગાદિ-, દોષસ્ત્રૈલોક્યપૂજિતઃ ।
યથાસ્થિતાર્થવાદી ચ, દેવોઽર્હન્ પરમેશ્વરઃ ॥૪॥
ધ્યાતવ્યોઽયમુપાસ્યોઽય-, મયં શરણમિષ્યતામ્ ।
અસ્યૈવ પ્રતિપત્તવ્યં, શાસનં ચેતનાઽસ્તિ ચેત્ ॥૫॥
યે સ્ત્રીશસ્ત્રાક્ષસૂત્રાદિ-, રાગાદ્યઙ્કકલઙ્કિતાઃ ।
નિગ્રહાનુગ્રહપરા-, સ્તે દેવાઃ સ્યુર્ન મુક્તયે ॥૬॥
નાટ્યાટ્ટહાસસઙ્ગીતા-, દ્યુપપ્લવવિસંસ્થુલાઃ ।

લમ્ભયેયુઃ પદં શાન્તં, પ્રપન્નાન્ પ્રાણિનઃ કથમ્ ॥૭॥
મહાવ્રતધરા ધીરા, ભૈક્ષમાત્રોપજીવિનઃ ।
સામાયિકસ્થા ધર્મ્મોપ-, દેશકા ગુરવો મતાઃ ॥૮॥
સર્વાભિલાષિણઃ સર્વ-, ભોજિનઃ સપરિગ્રહાઃ ।
અબ્રહ્મચારિણો મિથ્યો-પદેશા ગુરવો ન તુ ॥૯॥
પરિગ્રહારમ્ભમગ્ના-, સ્તારયેયુઃ કથં પરાન્ ।
સ્વયં દરિદ્રો ન પર-, મીશ્વરીકર્તુમીશ્વરઃ ॥૧૦॥
દુર્ગતિપ્રપતત્પ્રાણિ-, ધારણાદ્ધર્મ્મ ઉચ્યતે ।
સંયમાદિર્દશવિધઃ, સર્વજ્ઞોક્તો વિમુક્તયે ॥૧૧॥
અપૌરુષેયં વચન-, મસમ્ભવિ ભવેદ્યદિ ।
ન પ્રમાણં ભવેદ્વાચાં, હ્યાપ્તાધીના પ્રમાણતા ॥૧૨॥
મિથ્યાદૃષ્ટિભિરામ્નાતો, હિંસાદ્યૈઃ કલુષીકૃતઃ ।
સ ધર્મ ઇતિ વિત્તોઽપિ, ભવભ્રમણકારણમ્ ॥૧૩॥
સરાગોઽપિ હિ દેવશ્ચેદ્, ગુરુરબ્રહ્મચાર્યપિ ।
કૃપાહીનોઽપિ ધર્મ્મઃ સ્યાત્, કષ્ટં નષ્ટં હહા જગત્ ॥૧૪॥
શમસંવેગનિર્વેદા-નુકમ્પાસ્તિક્યલક્ષણૈઃ ।
લક્ષણૈઃ પઞ્ચભિઃ સમ્યક્, સમ્યક્ત્વમુપલક્ષ્યતે ॥૧૫॥
સ્થૈર્યં પ્રભાવના ભક્તિઃ, કૌશલં જિનશાસને ।
તીર્થસેવા ચ પઞ્ચાસ્ય, ભૂષણાનિ પ્રચક્ષતે ॥૧૬॥
શઙ્કા કાઙ્ક્ષા વિચિકિત્સા, મિથ્યાદૃષ્ટિપ્રશંસનમ્ ।
તત્સંસ્તવશ્ચ પઞ્ચાપિ, સમ્યક્ત્વં દૂષયન્ત્યલમ્ ॥૧૭॥
વિરતિં સ્થૂલહિંસાદે-ર્દ્વિવિધત્રિવિધાદિના ।
અહિંસાદીનિ પઞ્ચાણુ-વ્રતાનિ જગદુર્જિનાઃ ॥૧૮॥
પઙ્ગુકુષ્ઠિકુણિત્વાદિ, દૃષ્ટ્વા હિંસાફલં સુધીઃ ।
નિરાગસ્ત્રસજન્તૂનાં, હિંસાં સઙ્કલ્પતસ્ત્યજેત્ ॥૧૯॥
આત્મવત્ સર્વભૂતેષુ, સુખદુઃખે પ્રિયાપ્રિયે ।
ચિન્તયન્નાત્મનોઽનિષ્ટાં, હિંસામન્યસ્ય નાચરેત્ ॥૨૦॥
નિરર્થિકાં ન કુર્વીત, જીવેષુ સ્થાવરેષ્વપિ ।
હિંસામહિંસાધર્મજ્ઞઃ, કાઙ્ક્ષન્મોક્ષમુપાસકઃ ॥૨૧॥
પ્રાણી પ્રાણિતલોભેન, યો રાજ્યમપિ મુઞ્ચતિ ।
તદ્વધોત્થમઘં સર્વો-,ર્વીદાનેઽપિ ન શામ્યતિ ॥૨૨॥
વને નિરપરાધાનાં, વાયુતોયતૃણાશિનામ્ ।
નિઘ્નન્ મૃગાણાં માંસાર્થી, વિશિષ્યેત કથં શુનઃ ॥૨૩॥
દીર્યમાણઃ કુશેનાપિ, યઃ સ્વાઙ્ગે હન્ત દૂયતે ।
નિર્મન્તૂન્ સ કથં જન્તૂ-, નન્તયેન્નિશિતાયુધૈઃ ॥૨૪॥
નિર્માતું ક્રૂરકર્માણઃ, ક્ષણિકામાત્મનો ધૃતિમ્ ।
સમાપયન્તિ સકલં, જન્માન્યસ્ય શરીરિણઃ ॥૨૫॥
મ્રિયસ્વેત્યુચ્યમાનોઽપિ, દેહી ભવતિ દુઃખિતઃ ।
માર્યમાણઃ પ્રહરણૈ-, ર્દારુણૈઃ સ કથં ભવેત્ ॥૨૬॥
શ્રૂયતે પ્રાણિઘાતેન, રૌદ્રધ્યાનપરાયણૌ ।
સુભૂમો બ્રહ્મદત્તશ્ચ, સપ્તમં નરકં ગતૌ ॥૨૭॥
કુણિર્વરં વરં પઙ્ગુ-રશરીરી વરં પુમાન્ ।
અપિ સમ્પૂર્ણસર્વાઙ્ગો, ન તુ હિંસાપરાયણઃ ॥૨૮॥
હિંસા વિઘ્નાય જાયેત, વિઘ્નશાન્ત્યૈ કૃતાઽપિ હિ ।
કુલાચારધિયાઽપ્યેષા, કૃતા કુલવિનાશિની ॥૨૯॥
અપિ વંશક્રમાયાતાં, યસ્તુ હિંસાં પરિત્યજેત્ ।

સ શ્રેષ્ઠઃ સુલસ ઇવ, કાલસૌકરિકાત્મજઃ ॥૩૦॥
દમો દેવગુરૂપાસ્તિ-,ર્દાનમધ્યયનં તપઃ ।
સર્વમપ્યેતદફલં, હિંસાં ચેન્ન પરિત્યજેત્ ॥૩૧॥
વિશ્વસ્તો મુગ્ધધીર્લોકઃ, પાત્યતે નરકાવનૌ ।
અહો નૃશંસૈર્લોભાન્ધૈ-, ર્હિંસ્રશાસ્ત્રોપદેશકૈઃ ॥૩૨॥
'યજ્ઞાર્થં પશવઃ સૃષ્ટાઃ, સ્વયમેવ સ્વયંભુવા ।
યજ્ઞોऽસ્ય ભૂત્યૈ સર્વસ્ય, તસ્માદ્યજ્ઞે વધોऽવધઃ ॥૩૩॥
ઔષધ્યઃ પશવો વૃક્ષા-, સ્તિર્યઞ્ચઃ પક્ષિણસ્તથા ।
યજ્ઞાર્થં નિધનં પ્રાપ્તાઃ, પ્રાપ્નુવન્ત્યુચ્છ્રિતિં પુનઃ ॥૩૪॥
મધુપર્કે ચ યજ્ઞે ચ, પિતૃદૈવતકર્મણિ ।
અત્રૈવ પશવો હિંસ્યા, નાન્યત્રેત્યબ્રવીન્મનુઃ ॥૩૫॥
એષ્વર્થેષુ પશૂન્ હિંસન્, વેદતત્ત્વાર્થવિદ્ દ્વિજઃ ।
આત્માનં ચ પશૂંશ્ચૈવ, ગમયત્યુત્તમાં ગતિમ્' ॥૩૬॥
યે ચક્રુઃ ક્રૂરકર્માણઃ શાસ્ત્રં હિંસોપદેશકમ્ ।
ક્વ તે યાસ્યન્તિ નરકે, નાસ્તિકેભ્યોપિ નાસ્તિકાઃ ॥૩૭॥
વરં વરાકશ્ચાર્વાકો, યોऽસૌ પ્રકટનાસ્તિકઃ ।
વેદોક્તિતાપસચ્છદ્મ-,ચ્છન્નં રક્ષો ન જૈમિનિઃ ॥૩૮॥
દેવોપહારવ્યાજેન, યજ્ઞવ્યાજેન યેऽથવા ।
ઘ્નન્તિ જન્તૂન્ ગતઘૃણા, ઘોરાં તે યાન્તિ દુર્ગતિમ્ ॥૩૯॥
શમશીલદયામૂલં, હિત્વા ધર્મં જગદ્ધિતમ્ ।
અહો હિંસાऽપિ ધર્માય, જગદે મન્દબુદ્ધિભિઃ ॥૪૦॥
'હવિર્યચ્ચિરરાત્રાય, યચ્ચાનન્ત્યાય કલ્પતે ।
પિતૃભ્યો વિધિવદ્દત્તં, તત્પ્રવક્ષ્યામ્યશેષતઃ ॥૪૧॥
'તિલવ્રીહિયવૈર્માષૈ-રદ્ભિર્મૂલફલેન ચ ।
દત્તેન માસં પ્રીયન્તે, વિધિવત્પિતરો નૃણામ્ ॥૪૨॥
'દ્વૌ માસૌ મત્સ્યમાંસેન, ત્રીન્ માસાન્ હારિણેન તુ ।
ઔરભ્રેણાથ ચતુરઃ, શાકુનેનેહ પઞ્ચ તુ ॥૪૩॥
'ષણ્માસાંશ્છાગમાંસેન, પાર્ષતેનેહ સપ્ત વૈ ।
અષ્ટાવેણસ્ય માંસેન, રૌરવેણ નવૈવ તુ ॥૪૪॥
'દશ માસાંસ્તુ તૃપ્યન્તિ, વરાહમહિષામિષૈઃ ।
શશકૂર્મયોર્માંસેન, માસાનેકાદશૈવ તુ ॥૪૫॥
'સંવત્સરં તુ ગવ્યેન, પયસા પાયસેન તુ ।
વાર્ધ્રીણસસ્ય માંસેન તૃપ્તિર્દ્વાદશવાર્ષિકી' ॥૪૬॥
ઇતિ સ્મૃત્યનુસારેણ, પિતૃણાં તર્પણાય યા ।
મૂઢૈર્વિધીયતે હિંસા, સાऽપિ દુર્ગતિહેતવે ॥૪૭॥
યો ભૂતેષ્વભયં દદ્યાદ્, ભૂતેભ્યસ્તસ્ય નો ભયમ્ ।
યાદૃગ્વિતીર્યતે દાનં, તાદૃગાસાદ્યતે ફલમ્ ॥૪૮॥
કોદણ્ડદણ્ડચક્રાસિ,- શૂલશક્તિધરાઃ સુરાઃ ।
હિંસકા અપિ હા કષ્ટં, પૂજ્યન્તે દેવતાધિયા ॥૪૯॥
માતેવ સર્વભૂતાના-, મહિંસા હિતકારિણી ।
અહિંસૈવ હિ સંસાર-, મરાવમૃતસારણિઃ ॥૫૦॥
અહિંસા દુઃખદાવાગ્નિ-, પ્રાવૃષેણ્યઘનાવલી ।
ભવભ્રમિરુગાર્ત્તાના-, મહિંસા પરમૌષધી ॥૫૧॥
દીર્ઘમાયુઃ પરં રૂપ-, મારોગ્યં શ્લાઘનીયતા ।
અહિંસાયાઃ ફલં સર્વં, કિમન્યત્કામદૈવ સા ॥૫૨॥
મન્મનત્વં, કાહલત્વં, મૂકત્વં મુખરોગિતામ્ ।

વીક્ષ્યાસત્યફલં કન્યા-લીકાદ્યસત્યમુત્સૃજેત્ ॥૫૩॥
કન્યાગોભૂમ્યલીકાનિ, ન્યાસાપહરણં તથા ।
કૂટસાક્ષ્યં ચ પઞ્ચેતિ, સ્થૂલાસત્યાન્યકીર્ત્તયન્ ॥૫૪॥
સર્વલોકવિરુદ્ધં યદ્, યદ્વિશ્વસિતઘાતકમ્ ।
યદ્વિપક્ષશ્ચ પુણ્યસ્ય, ન વદેત્તદસૂનૃતમ્ ॥૫૫॥
અસત્યતો લઘીયસ્ત્વ-, મસત્યાદ્વચનીયતા ।
અધોગતિરસત્યાચ્ચ, તદસત્યં પરિત્યજેત્ ॥૫૬॥
અસત્યવચનં પ્રાજ્ઞઃ, પ્રમાદેનાપિ નો વદેત્ ।
શ્રેયાંસિ યેન ભજ્યન્તે, વાત્યયેવ મહાદ્રુમાઃ ॥૫૭॥
અસત્યવચનાદ્વૈર-, વિષાદાપ્રત્યયાદયઃ ।
પ્રાદુઃષન્તિ ન કે દોષાઃ, કુપથ્યાદ્ વ્યાધયો યથા ॥૫૮॥
નિગોદેષ્વથ તિર્યક્ષુ, તથા નરકવાસિષુ ।
ઉત્પદ્યન્તે મૃષાવાદ-પ્રસાદેન શરીરિણઃ ॥૫૯॥
બ્રૂયાદ્ ભિયોપરોધાદ્વા, નાસત્યં કાલિકાર્યવત્ ।
યસ્તુ બ્રૂતે સ નરકં, પ્રયાતિ વસુરાજવત્ ॥૬૦॥
ન સત્યમપિ ભાષેત, પરપીડાકરં વચઃ ।
લોકેડપિ શ્રૂયતે યસ્માત્ કૌશિકો નરકં ગતઃ ॥૬૧॥
અલ્પાદપિ મૃષાવાદાદ્, રૌરવાદિષુ સંભવઃ ।
અન્યથા વદતાં જૈનીં, વાચં ત્વહહ કા ગતિઃ ॥૬૨॥
જ્ઞાનચારિત્રયોર્મૂલં, સત્યમેવ વદન્તિ યે ।
ધાત્રી પવિત્રીક્રિયતે, તેષાં ચરણરેણુભિઃ ॥૬૩॥
અલીકં યે ન ભાષન્તે, સત્યવ્રતમહાધનાઃ ।
નાપરાદ્ધુમલં તેભ્યો, ભૂતપ્રેતોરગાદયઃ ॥૬૪॥
દૌર્ભાગ્યં પ્રેષ્યતાં દાસ્ય-મઙ્ગચ્છેદં દરિદ્રતામ્ ।
અદત્તાત્તફલં જ્ઞાત્વા, સ્થૂલસ્તેયં વિવર્જયેત્ ॥૬૫॥
પતિતં વિસ્મૃતં નષ્ટં, સ્થિતં સ્થાપિતમાહિતમ્ ।
અદત્તં નાદદીત સ્વં, પરકીયં ક્વચિત્સુધીઃ ॥૬૬॥
અયં લોકઃ પરલોકો, ધર્મો ધૈર્યં ધૃતિર્મતિઃ ।
મુષ્ણતા પરકીયં સ્વં, મુષિતં સર્વમપ્યદઃ ॥૬૭॥
એકસ્યૈકં ક્ષણં દુઃખં, માર્યમાણસ્ય જાયતે ।
સપુત્રપૌત્રસ્ય પુન-ર્યાવજ્જીવં હૃતે ધને ॥૬૮॥
ચૌર્યપાપદ્રુમસ્યેહ, વધબન્ધાદિકં ફલમ્ ।
જાયતે પરલોકે તુ, ફલં નરકવેદના ॥૬૯॥
દિવસે વા રજન્યાં વા, સ્વપ્ને વા જાગરેડપિ વા ।
સશલ્ય ઇવ ચૌર્યેણ, નૈતિ સ્વાસ્થ્યં નરઃ ક્વચિત્ ॥૭૦॥
મિત્રપુત્રકલત્રાણિ, ભ્રાતરઃ પિતરોડપિ હિ ।
સંસૃજન્તિ ક્ષણમપિ, ન મ્લેચ્છૈરિવ તસ્કરૈઃ ॥૭૧॥
સંબન્ધ્યપિ નિગૃહ્યેત, ચૌર્યાન્મણ્ડિકવન્નૃપૈઃ ।
ચૌરોડપિ ત્યક્તચૌર્યઃ સ્યાત્, સ્વર્ગભાગ્રૌહિણેયવત્ ॥૭૨॥
દૂરે પરસ્ય સર્વસ્વ-, મપહર્તુમુપક્રમઃ ।
ઉપાદદીત નાદત્તં, તૃણમાત્રમપિ ક્વચિત્ ॥૭૩॥
પરાર્થગ્રહણે યેષાં, નિયમઃ શુદ્ધચેતસામ્ ।
અભ્યાયાન્તિ શ્રિયસ્તેષાં, સ્વયમેવ સ્વયંવરાઃ ॥૭૪॥
અનર્થા દૂરતો યાન્તિ, સાધુવાદઃ પ્રવર્તતે ।
સ્વર્ગસૌખ્યાનિ ઢૌકન્તે, સ્ફુટમસ્તેયચારિણામ્ ॥૭૫॥
ષણ્ઢત્વમિન્દ્રિયચ્છેદં, વીક્ષ્યાબ્રહ્મફલં સુધીઃ ।

ભવેત્ સ્વદારસંતુષ્ટો-, ઽન્યદારાન્ વા વિવર્જયેત્ ॥૭૬॥
રમ્યમાપાતમાત્રે યત્, પરિણામેઽતિદારુણમ્ ।
કિમ્પાકફલસઙ્કાશં, તત્કઃ સેવેત મૈથુનમ્ ॥૭૭॥
કમ્પઃ સ્વેદઃ શ્રમો મૂર્ચ્છા, ભ્રમિર્ગ્લાનિર્બલક્ષયઃ ।
રાજયક્ષ્માદિરોગાશ્ચ, ભવેયુર્મૈથુનોત્થિતાઃ ॥૭૮॥
યોનિયન્ત્રસમુત્પન્નાઃ, સુસૂક્ષ્મા જન્તુરાશયઃ ।
પીડ્યમાના વિપદ્યન્તે, યત્ર તન્મૈથુનં ત્યજેત્ ॥૭૯॥
'રક્તજાઃ કૃમયઃ સૂક્ષ્મા, મૃદુમધ્યાધિશક્તયઃ ।
જન્મવર્ત્મસુ કણ્ડૂતિં, જનયન્તિ તથાવિધામ્ ॥૮૦॥
સ્ત્રીસમ્ભોગેન યઃ કામ-, જ્વરં પ્રતિચિકીર્ષતિ ।
સ હુતાશં ઘૃતાહુત્યા, વિધ્યાપયિતુમિચ્છતિ ॥૮૧॥
વરં જ્વલદયઃસ્તમ્ભ-, પરિરમ્ભો વિધીયતે ।
ન પુનર્નરકદ્વાર-, રામાજઘનસેવનમ્ ॥૮૨॥
સતામપિ હિ વામભ્રૂ-ર્દદાના હૃદયે પદમ્ ।
અભિરામં ગુણગ્રામં, નિર્વાસયતિ નિશ્ચિતમ્ ॥૮૩॥
વઞ્ચકત્વં નૃશંસત્વં, ચઞ્ચલત્વં કુશીલતા ।
ઇતિ નૈસર્ગિકા દોષા, યાસાં તાસુ રમેત કઃ ॥૮૪॥
પ્રાપ્તું પારમપારસ્ય, પારાવારસ્ય પાર્યતે ।
સ્ત્રીણાં પ્રકૃતિવક્રાણાં, દુશ્ચરિત્રસ્ય નો પુનઃ ॥૮૫॥
નિતમ્બિન્યઃ પતિં પુત્રં, પિતરં ભ્રાતરં ક્ષણાત્ ।
આરોપયન્ત્યકાર્યેઽપિ, દુર્વૃત્તાઃ પ્રાણસંશયે ॥૮૬॥
ભવસ્ય બીજં નરક-, દ્વારમાર્ગસ્ય દીપિકા ।
શુચાં કન્દઃ કલેર્મૂલં, દુઃખાનાં ખનિરઙ્ગના ॥૮૭॥
મનસ્યન્યદ્વચસ્યન્યત્, ક્રિયાયામન્યદેવ હિ ।
યાસાં સાધારણસ્ત્રીણાં, તાઃ કથં સુખહેતવઃ ॥૮૮॥
માંસમિશ્રં સુરામિશ્ર-, મનેકવિટચુમ્બિતમ્ ।
કો વેશ્યાવદનં ચુમ્બે-, દુચ્છિષ્ટમિવ ભોજનમ્ ॥૮૯॥
અપિ પ્રદત્તસર્વસ્વાત્, કામુકાત્ ક્ષીણસમ્પદઃ ।
વાસોઽપ્યાચ્છેત્તુમિચ્છન્તિ, ગચ્છતઃ પણ્યયોષિતઃ ॥૯૦॥
ન દેવાન્ન ગુરૂન્નાપિ, સુહૃદો ન ચ બાન્ધવાન્ ।
અસત્સઙ્ગરતિર્નિત્યં, વેશ્યાવશ્યો હિ મન્યતે ॥૯૧॥
કુષ્ઠિનોઽપિ સ્મરસમાન્, પશ્યન્તીં ધનકાઙ્ક્ષયા ।
તન્વન્તીં કૃત્રિમં સ્નેહં, નિઃસ્નેહાં ગણિકાં ત્યજેત્ ॥૯૨॥
નાસક્ત્યા સેવનીયા હિ, સ્વદારા અપ્યુપાસકૈઃ ।
આકરઃ સર્વપાપાનાં, કિં પુનઃ પરયોષિતઃ ॥૯૩॥
સ્વપતિં યા પરિત્યજ્ય, નિસ્ત્રપોપપતિં ભજેત્ ।
તસ્યાં ક્ષણિકચિત્તાયાં, વિશ્રમ્ભઃ કોઽન્યયોષિતિ ॥૯૪॥
ભીરોરાકુલચિત્તસ્ય, દુઃસ્થિતસ્ય પરસ્ત્રિયામ્ ।
રતિર્ન યુજ્યતે કર્તુ-, મુપશૂનં પશોરિવ ॥૯૫॥
પ્રાણસન્દેહજનનં, પરમં વૈરકારણમ્ ।
લોકદ્વયવિરુદ્ધં ચ, પરસ્ત્રીગમનં ત્યજેત્ ॥૯૬॥
સર્વસ્વહરણં બન્ધં, શરીરાવયવચ્છિદામ્ ।
મૃતશ્ચ નરકં ઘોરં, લભતે પારદારિકઃ ॥૯૭॥
સ્વદારરક્ષણે યત્નં, વિદધાનો નિરન્તરમ્ ।
જાનન્નપિ જનો દુઃખં, પરદારાન્ કથં વ્રજેત્ ॥૯૮॥
વિક્રમાક્રાન્તવિશ્વોઽપિ, પરસ્ત્રીષુ રિરંસયા ।

કૃત્વા કુલક્ષયં પ્રાપ, નરકં દશકન્ધરઃ ॥૯૯॥
લાવણ્યપુણ્યાવયવાં, પદં સૌન્દર્યસમ્પદઃ ।
કલાકલાપકુશલા-, મપિ જહ્યાત્પરસ્ત્રિયમ્ ॥૧૦૦॥
અકલઙ્કમનોવૃત્તેઃ, પરસ્ત્રીસન્નિધાવપિ ।
સુદર્શનસ્ય કિં બ્રૂમઃ, સુદર્શનસમુન્નતેઃ? ॥૧૦૧॥
ઐશ્વર્યરાજરાજોઽપિ, રૂપમીનધ્વજોઽપિ ચ ।
સીતયા રાવણ ઇવ, ત્યાજ્યો નાર્યા નરઃ પરઃ ॥૧૦૨॥
નપુંસકત્વં તિર્યક્ત્વં, દૌર્ભાગ્યં ચ ભવે ભવે ।
ભવેન્નરાણાં સ્ત્રીણાં ચા-, ન્યકાન્તાસક્તચેતસામ્ ॥૧૦૩॥
પ્રાણભૂતં ચરિત્રસ્ય, પરબ્રહ્મૈકકારણમ્ ।
સમાચરન્ બ્રહ્મચર્યં, પૂજિતૈરપિ પૂજ્યતે ॥૧૦૪॥
ચિરાયુષઃ સુસંસ્થાના, દૃઢસંહનના નરાઃ ।
તેજસ્વિનો મહાવીર્યા, ભવેયુર્બ્રહ્મચર્યતઃ ॥૧૦૫॥
અસન્તોષમવિશ્વાસ-, મારમ્ભં દુઃખકારણમ્ ।
મત્વા મૂર્ચ્છાફલં કુર્યાત્, પરિગ્રહનિયન્ત્રણમ્ ॥૧૦૬॥
પરિગ્રહમહત્ત્વાદ્ધિ, મજ્જત્યેવ ભવામ્બુધૌ ।
મહાપોત ઇવ પ્રાણી, ત્યજેત્તસ્માત્ પરિગ્રહમ્ ॥૧૦૭॥
ત્રસરેણુસમોઽપ્યત્ર, ન ગુણઃ કોઽપિ વિદ્યતે ।
દોષાસ્તુ પર્વતસ્થૂલાઃ, પ્રાદુષ્ષન્તિ પરિગ્રહે ॥૧૦૮॥
સઙ્ગાદ્ ભવન્ત્યસન્તોઽપિ, રાગદ્વેષાદયો દ્વિષઃ ।
મુનેરપિ ચલેચ્ચેતો, યત્તેનાન્દોલિતાત્મનઃ ॥૧૦૯॥
સંસારમૂલમારમ્ભા-, સ્તેષાં હેતુઃ પરિગ્રહઃ ।
તસ્માદુપાસકઃ કુર્યા-, દલ્પમલ્પં પરિગ્રહમ્ ॥૧૧૦॥
મુષ્ણન્તિ વિષયસ્તેના, દહતિ સ્મરપાવકઃ ।
રુન્ધન્તિ વનિતાવ્યાધાઃ, સઙ્ગૈરઙ્ગીકૃતં નરમ્ ॥૧૧૧॥
તૃપ્તો ન પુત્રૈઃ સગરઃ, કુચિકર્ણો ન ગોધનૈઃ ।
ન ધાન્યૈસ્તિલકશ્રેષ્ઠી, ન નન્દઃ કનકોત્કરૈઃ ॥૧૧૨॥
તપઃશ્રુતપરીવારાં, શમસામ્રાજ્યસમ્પદમ્ ।
પરિગ્રહગ્રહગ્રસ્તા-, સ્ત્યજેયુર્યોગિનોઽપિ હિ ॥૧૧૩॥
અસંતોષવતઃ સૌખ્યં, ન શક્રસ્ય ન ચક્રિણઃ ।
જન્તોઃ સન્તોષભાજો ય-, દભયસ્યેવ જાયતે ॥૧૧૪॥
સન્નિધૌ નિધયસ્તસ્ય, કામગવ્યનુગામિની ।
અમરાઃ કિઙ્કરાયન્તે, સન્તોષો યસ્ય ભૂષણમ્ ॥૧૧૫॥

## તૃતીયઃ પ્રકાશઃ

દશસ્વપિ કૃતા દિક્ષુ, યત્ર સીમા ન લઙ્ઘ્યતે ।
ખ્યાતં દિગ્વિરતિરિતિ, પ્રથમં તદ્ ગુણવ્રતમ્ ॥૧॥
ચરાચરાણાં જીવાનાં, વિમર્દનનિવર્તનાત્ ।
તપ્તાયોગોલકલ્પસ્ય, સદ્વ્રતં ગૃહિણોઽપ્યદઃ ॥૨॥
જગદાક્રમમાણસ્ય, પ્રસરલ્લોભવારિધેઃ ।
સ્ખલનં વિદધે તેન, યેન દિગ્વિરતિઃ કૃતા ॥૩॥
ભોગોપભોગયોઃ સંખ્યા, શક્ત્યા યત્ર વિધીયતે ।
ભોગોપભોગમાનં તદ્, દ્વૈતીયીકં ગુણવ્રતમ્ ॥૪॥
સકૃદેવ ભુજ્યતે યઃ, સ ભોગોઽન્નસ્રગાદિકઃ ।

પુનઃ પુનઃ પુનર્ભોગ્ય, ઉપભોગોઽઙ્ગનાદિકઃ ॥૫॥
મદ્યં માંસં નવનીતં, મધૂદુમ્બરપઞ્ચકમ્ ।
અનન્તકાયમજ્ઞાત-, ફલં રાત્રૌ ચ ભોજનમ્ ॥૬॥
આમગોરસસંપૃક્તં, દ્વિદલં પુષ્પિતૌદનમ્ ।
દધ્યહર્દ્વિતયાતીતં, કુથિતાન્નં ચ વર્જયેત્ ॥૭॥
મદિરાપાનમાત્રેણ, બુદ્ધિર્નશ્યતિ દૂરતઃ ।
વૈદગ્ધીબન્ધુરસ્યાપિ, દૌર્ભાગ્યેણેવ કામિની ॥૮॥
પાપાઃ કાદમ્બરીપાન-વિવશીકૃતચેતસઃ ।
જનનીં હા પ્રિયીયન્તિ, જનનીયન્તિ ચ પ્રિયામ્ ॥૯॥
ન જાનાતિ પરં સ્વં વા, મદ્યાચ્ચલિતચેતનઃ ।
સ્વામીયતિ વરાકઃ સ્વં, સ્વામિનં કિઙ્કરીયતિ ॥૧૦॥
મદ્યપસ્ય શબસ્યેવ, લુઠિતસ્ય ચતુષ્પથે ।
મૂત્રયન્તિ મુખે શ્વાનો, વ્યાત્તે વિવરશઙ્કયા ॥૧૧॥
મદ્યપાનરસે મગ્નો, નગ્નઃ સ્વપિતિ ચત્વરે ।
ગૂઢં ચ સ્વમભિપ્રાયં, પ્રકાશયતિ લીલયા ॥૧૨॥
વારુણીપાનતો યાન્તિ, કાન્તિકીર્ત્તિમતિશ્રિયઃ ।
વિચિત્રાશ્ચિત્રરચના, વિલુઠત્કજ્જલાદિવ ॥૧૩॥
ભૂતાત્તવન્નરીનર્તિ, રારટીતિ સશોકવત્ ।
દાહજ્વરાર્ત્તવદ્ ભૂમૌ, સુરાપો લોલુઠીતિ ચ ॥૧૪॥
વિદધત્યઙ્ગશૈથિલ્યં, ગ્લપયન્તીન્દ્રિયાણિ ચ ।
મૂર્ચ્છામતુચ્છાં યચ્છન્તી, હાલા હાલાહલોપમા ॥૧૫॥
વિવેકઃ સંયમો જ્ઞાનં, સત્યં શૌચં દયા ક્ષમા ।
મદ્યાત્પ્રલીયતે સર્વં, તૃણ્યા વહ્નિકણાદિવ ॥૧૬॥
દોષાણાં કારણં મદ્યં, મદ્યં કારણમાપદામ્ ।
રોગાતુર ઇવાપથ્યં, તસ્માન્મદ્યં વિવર્જયેત્ ॥૧૭॥
ચિખાદિષતિ યો માંસં, પ્રાણિ-પ્રાણાપહારતઃ ।
ઉન્મૂલયત્યસૌ મૂલં, દયાઽઽખ્યં ધર્મશાખિનઃ ॥૧૮॥
અશનીયન્ સદા માંસં, દયાં યો હિ ચિકીર્ષતિ ।
જ્વલતિ જ્વલને વલ્લીં, સ રોપયિતુમિચ્છતિ ॥૧૯॥
હન્તા પલસ્ય વિક્રેતા, સંસ્કર્તા ભક્ષકસ્તથા ।
ક્રેતાઽનુમન્તા દાતા ચ, ઘાતકા એવ યન્મનુઃ ॥૨૦॥
'અનુમન્તા વિશસિતા, નિહન્તા ક્રયવિક્રયી ।
સંસ્કર્તા ચોપહર્ત્તા ચ, ખાદકશ્ચેતિ ઘાતકાઃ' ॥૨૧॥
'નાકૃત્વા પ્રાણિનાં હિંસાં, માંસમુત્પદ્યતે ક્વચિત્ ।
ન ચ પ્રાણિવધઃ સ્વર્ગ્ય-સ્તસ્માન્માંસં વિવર્જયેત્ ॥૨૨॥
યે ભક્ષયન્ત્યન્યપલં, સ્વકીયપલપુષ્ટયે ।
ત એવ ઘાતકા યન્ન, વધકો ભક્ષકં વિના ॥૨૩॥
મિષ્ટાન્નાન્યપિ વિષ્ઠાસા-દમૃતાન્યપિ મૂત્રસાત્ ।
સ્યુર્યસ્મિન્નઙ્ગકસ્યાસ્ય, કૃતે કઃ પાપમાચરેત્ ॥૨૪॥
માંસાશને ન દોષોઽસ્તી-ત્યુચ્યતે યૈર્દુરાત્મભિઃ ।
વ્યાધગૃધ્રવૃકવ્યાઘ્ર-શૃગાલાસ્તૈર્ગુરૂકૃતાઃ ॥૨૫॥
'માં સ ભક્ષયિતાઽમુત્ર', યસ્ય માંસમિહાદ્મ્યહમ્ ।
એતન્માંસસ્ય માંસત્વે, નિરુક્તં મનુરબ્રવીત્ ॥૨૬॥
માંસાસ્વાદનલુબ્ધસ્ય, દેહિનં દેહિનં પ્રતિ ।
હન્તું પ્રવર્તતે બુદ્ધિઃ, શાકિન્યા ઇવ દુર્ધિયઃ ॥૨૭॥
યે ભક્ષયન્તિ પિશિતં, દિવ્યભોજ્યેષુ સત્સ્વપિ ।

સુધારસં પરિત્યજ્ય, ભુઞ્જતે તે હલાહલમ્ ॥૨૮॥
ન ધર્મો નિર્દયસ્યાસ્તિ, પલાદસ્ય કુતો દયા ।
પલલુબ્ધો ન તદ્વેત્તિ, વિદ્યાદ્વોપદિશેન્ન હિ ॥૨૯॥
કેચિન્માંસં મહામોહા-દશ્નન્તિ ન પરં સ્વયમ્ ।
દેવપિત્રતિથિભ્યોઽપિ, કલ્પયન્તિ યદૂચિરે ॥૩૦॥
'ક્રીત્વા સ્વયં વાઽપ્યુત્પાદ્ય, પરોપહૃતમેવ વા ।
દેવાન્ પિતૃન્ સમભ્યર્ચ્ય, ખાદન્ માંસં ન દુષ્યતિ' ॥૩૧॥
મન્ત્રસંસ્કૃતમપ્યદ્યાદ્, યવાલ્પમપિ નો પલમ્ ।
ભવેજ્જીવિતનાશાય, હાલાહલલવોઽપિ હિ ॥૩૨॥
સદ્યઃ સમ્મૂર્છિતાનન્ત-જન્તુસન્તાનદૂષિતમ્ ।
નરકાધ્વનિ પાથેયં, કોઽશ્નીયાત્ પિશિતં સુધીઃ ॥૩૩॥
અન્તર્મુહૂર્તાત્ પરતઃ, સુસૂક્ષ્મા જન્તુરાશયઃ ।
યત્ર મૂર્ચ્છન્તિ તન્નાદ્યં, નવનીતં વિવેકિભિઃ ॥૩૪॥
એકસ્યાઽપિ હિ જીવસ્ય હિંસને કિમઘં ભવેત્ ।
જન્તુજાતમયં તત્કો, નવનીતં નિષેવતે? ॥૩૫॥
અનેકજન્તુસઙ્ઘાત-નિઘાતનસમુદ્ભવમ્ ।
જુગુપ્સનીયં લાલાવત્, કઃ સ્વાદયતિ માક્ષિકમ્ ॥૩૬॥
ભક્ષયન્માક્ષિકં ક્ષુદ્ર-, જન્તુલક્ષક્ષયોદ્ભવમ્ ।
સ્તોકજન્તુનિહન્તૃભ્યઃ, શૌનિકેભ્યોઽતિરિચ્યતે ॥૩૭॥
એકૈકકુસુમક્રોડાદ્, રસમાપીય મક્ષિકાઃ ।
યદ્વમન્તિ મધૂચ્છિષ્ટં, તદશ્નન્તિ ન ધાર્મિકાઃ ॥૩૮॥
અપ્યૌષધકૃતે જગ્ધં, મધુ શ્વભ્રનિબન્ધનમ્ ।
ભક્ષિતઃ પ્રાણનાશાય, કાલકૂટકણોઽપિ હિ ॥૩૯॥
મધુનોઽપિ હિ માધુર્ય-, મબોધૈરહહોચ્યતે ।
આસાદ્યન્તે યદાસ્વાદા-, ચ્ચિરં નરકવેદનાઃ ॥૪૦॥
મક્ષિકામુખનિષ્ઠ્યૂતં, જન્તુઘાતોદ્ભવં મધુ ।
અહો પવિત્રં મન્વાના, દેવસ્નાને પ્રયુઞ્જતે ॥૪૧॥
ઉદુમ્બરવટપ્લક્ષ-કાકોદુમ્બરશાખિનામ્ ।
પિપ્પલસ્ય ચ નાશ્નીયાત્, ફલં કૃમિકુલાકુલમ્ ॥૪૨॥
અપ્રાપ્નુવન્નન્યભક્ષ્ય-મપિ ક્ષામો બુભુક્ષયા ।
ન ભક્ષયતિ પુણ્યાત્મા, પઞ્ચોદુમ્બરજં ફલમ્ ॥૪૩॥
આર્દ્રઃ કન્દઃ સમગ્રોઽપિ, સર્વઃ કિશલયોઽપિ ચ ।
સ્નુહી લવણવૃક્ષત્વક્, કુમારી ગિરિકર્ણિકા ॥૪૪॥
શતાવરી વિરૂઢાનિ, ગડૂચી કોમલામ્લિકા ।
પલ્યઙ્કોઽમૃતવલ્લી ચ, વલ્લઃ શૂકરસંજ્ઞિતઃ ॥૪૫॥
અનન્તકાયાઃ સૂત્રોક્તા, અપરેઽપિ કૃપાપરૈઃ ।
મિથ્યાદૃશામવિજ્ઞાતા, વર્જનીયાઃ પ્રયત્નતઃ ॥૪૬॥
સ્વયં પરેણ વા જ્ઞાતં, ફલમદ્યાદ્વિશારદઃ ।
નિષિદ્ધે વિષફલે વા, મા ભૂદસ્ય પ્રવર્તનમ્ ॥૪૭॥
અન્નં પ્રેતપિશાચાદ્યૈઃ, સઞ્ચરદ્ભિર્નિરઙ્કુશૈઃ ।
ઉચ્છિષ્ટં ક્રિયતે યત્ર, તત્ર નાદ્યાદ્દિનાત્યયે ॥૪૮॥
ઘોરાન્ધકારરુદ્ધાક્ષૈઃ, પતન્તો યત્ર જન્તવઃ ।
નૈવ ભોજ્યે નિરીક્ષ્યન્તે, તત્ર ભુઞ્જીત કો નિશિ? ॥૪૯॥
મેધાં પિપીલિકા હન્તિ, યૂકા કુર્યાજ્જલોદરમ્ ।
કુરુતે મક્ષિકા વાન્તિં, કુષ્ઠરોગં ચ કોલિકઃ ॥૫૦॥
કણ્ટકો દારુખણ્ડં ચ, વિતનોતિ ગલવ્યથામ્ ।

વ્યઞ્જનાન્તર્નિપતિત-સ્તાલુ વિધ્યતિ વૃશ્ચિકઃ ॥૫૧॥
વિલગ્નશ્ચ ગલે વાલઃ, સ્વરભઙ્ગાય જાયતે ।
ઇત્યાદયો દૃષ્ટદોષાઃ, સર્વેષાં નિશિ ભોજને ॥૫૨॥
નાપ્રેક્ષ્ય સૂક્ષ્મજન્તૂનિ, નિશ્યદ્યાત્ પ્રાસુકાન્યપિ ।
અપ્યુદ્યત્કેવલજ્ઞાનૈ-, ર્નાદૃતં યન્નિશાઽશનમ્ ॥૫૩॥
ધર્મવિન્નૈવ ભુઞ્જીત, કદાચન દિનાત્યયે ।
બાહ્યા અપિ નિશાભોજ્યં, યદભોજ્યં પ્રચક્ષતે ॥૫૪॥
'ત્રયીતેજોમયો ભાનુ-, રિતિ વેદવિદો વિદુઃ ।
તત્કરૈઃ પૂતમખિલં, શુભં કર્મ સમાચરેત્ ॥૫૫॥
'નૈવાહુતિર્ન ચ સ્નાનં, ન શ્રાદ્ધં દેવતાર્ચનમ્ ।
દાનં વા વિહિતં રાત્રૌ, ભોજનં તુ વિશેષતઃ' ॥૫૬॥
'દિવસસ્યાષ્ટમે ભાગે, મન્દીભૂતે દિવાકરે ।
નક્તં તદ્ધિ વિજાનીયાન્-, ન નક્તં નિશિભોજનમ્' ॥૫૭॥
'દેવૈસ્તુ ભુક્તં પૂર્વાહ્ણે, મધ્યાહ્ને ઋષિભિસ્તથા ।
અપરાહ્ણે ચ પિતૃભિઃ, સાયાહ્ને દૈત્યદાનવૈઃ ॥૫૮॥
'સન્ધ્યાયાં યક્ષરક્ષોભિઃ, સદા ભુક્તં કુલોદ્વહ! ।
સર્વવેલાં વ્યતિક્રમ્ય, રાત્રૌ ભુક્તમભોજનમ્ ॥૫૯॥
'હૃન્નાભિપદ્મસઙ્કોચ-, શ્ચણ્ડરોચિરપાયતઃ ।
અતો નક્તં ન ભોક્તવ્યં, સૂક્ષ્મજીવાદનાદપિ ॥૬૦॥
સંસૃજ્જીવસઙ્ઘાતં, ભુઞ્જાના નિશિ ભોજનમ્ ।
રાક્ષસેભ્યો વિશિષ્યન્તે, મૂઢાત્માનઃ કથંનુ તે ॥૬૧॥
વાસરે ચ રજન્યાં ચ, યઃ ખાદન્નેવ તિષ્ઠતિ ।
શૃઙ્ગપુચ્છપરિભ્રષ્ટઃ, સ્પષ્ટં સ પશુરેવ હિ ॥૬૨॥
અહ્નો મુખેઽવસાને ચ, યો દ્વે દ્વે ઘટિકે ત્યજન્ ।
નિશાભોજનદોષજ્ઞો-, ઽશ્નાત્યસૌ પુણ્યભાજનમ્ ॥૬૩॥
અકૃત્વા નિયમં દોષા-, ભોજનાદ્દિનભોજ્યપિ ।
ફલં ભજેન્ન નિર્વ્યાજં, ન વૃદ્ધિર્ભાષિતં વિના ॥૬૪॥
યે વાસરં પરિત્યજ્ય, રજન્યામેવ ભુઞ્જતે ।
તે પરિત્યજ્ય માણિક્યં, કાચમાદદતે જડાઃ ॥૬૫॥
વાસરે સતિ યે શ્રેય-, સ્કામ્યયા નિશિ ભુઞ્જતે ।
તે વપન્ત્યૂષરે ક્ષેત્રે, શાલીન્ સત્યપિ પલ્વલે ॥૬૬॥
ઉલૂકકાકમાર્જાર-, ગૃધ્રશમ્બરશૂકરાઃ ।
અહિવૃશ્ચિકગોધાશ્ચ, જાયન્તે રાત્રિભોજનાત્ ॥૬૭॥
શ્રૂયતે હ્યન્યશપથા, -નનાદૃત્યૈવ લક્ષ્મણઃ ।
નિશાભોજનશપથં, કારિતો વનમાલયા ॥૬૮॥
કરોતિ વિરતિં ધન્યો, યઃ સદા નિશિભોજનાત્ ।
સોઽર્દ્ધં પુરુષાયુષ્કસ્ય, સ્યાદવશ્યમુપોષિતઃ ॥૬૯॥
રજનીભોજનત્યાગે, યે ગુણાઃ પરિતોઽપિ તાન્ ।
ન સર્વજ્ઞાદૃતે કશ્ચિ-, દપરો વક્તુમીશ્વરઃ ॥૭૦॥
આમગોરસસંપૃક્ત-દ્વિદલાદિષુ જન્તવઃ ।
દૃષ્ટાઃ કેવલિભિઃ સૂક્ષ્મા-, સ્તસ્માત્તાનિ વિવર્જયેત્ ॥૭૧॥
જન્તુમિશ્રં ફલં પુષ્પં, પત્રં ચાન્યદપિ ત્યજેત્ ।
સન્ધાનમપિ સંસક્તં, જિનધર્મપરાયણઃ ॥૭૨॥
આર્ત્તં રૌદ્રમપધ્યાનં, પાપકર્મોપદેશિતા ।
હિંસોપકારિદાનં ચ, પ્રમાદાચરણં તથા ॥૭૩॥
શરીરાદ્યર્થદણ્ડસ્ય, પ્રતિપક્ષતયા સ્થિતઃ ।

યોઽનર્થદણ્ડસ્તત્ત્યાગ-સ્તૃતીયં તુ ગુણવ્રતમ્ ॥૭૪॥
વૈરિઘાતો નરેન્દ્રત્વં, પુરઘાતાગ્નિદીપને ।
ખેચરત્વાદ્યપધ્યાનં, મુહૂર્તાત્પરતસ્ત્યજેત્ ॥૭૫॥
વૃષભાન્ દમય ક્ષેત્રં, કૃષ ષણ્ઢય વાજિનઃ ।
દાક્ષિણ્યાવિષયે પાપો-પદેશોઽયં ન કલ્પતે ॥૭૬॥
યન્ત્રલાઙ્ગલશસ્ત્રાગ્નિ-, મુશલોદૂખલાદિકમ્ ।
દાક્ષિણ્યાવિષયે હિંસ્રં, નાર્પયેત્ કરુણાપરઃ ॥૭૭॥
કુતૂહલાદ્ગીતનૃત્ત-, નાટકાદિ - નિરીક્ષણમ્ ।
કામશાસ્ત્રપ્રસક્તિશ્ચ, દ્યૂતમદ્યાદિસેવનમ્ ॥૭૮॥
જલક્રીડાઽઽન્દોલનાદિ-વિનોદો જન્તુયોધનમ્ ।
રિપોઃ સુતાદિના વૈરં, ભક્તસ્ત્રીદેશરાટ્કથાઃ ॥૭૯॥
રોગમાર્ગશ્રમૌ મુક્ત્વા, સ્વાપશ્ચ સકલાં નિશામ્ ।
એવમાદિ પરિહરેત્, પ્રમાદાચરણં સુધીઃ ॥૮૦॥
વિલાસહાસનિષ્ઠ્યૂત-, નિદ્રાકલહદુષ્કથાઃ ।
જિનેન્દ્રભવનસ્યાન્ત-, રાહારં ચ ચતુર્વિધમ્ ॥૮૧॥
ત્યક્તાર્ત્તરૌદ્રધ્યાનસ્ય, ત્યક્તસાવદ્યકર્મણઃ ।
મુહૂર્તં સમતા યા તાં, વિદુઃ સામાયિકવ્રતમ્ ॥૮૨॥
સામાયિકવ્રતસ્થસ્ય, ગૃહિણોઽપિ સ્થિરાત્મનઃ ।
ચન્દ્રાવતંસકસ્યેવ, ક્ષીયતે કર્મ સઞ્ચિતમ્ ॥૮૩॥
દિગ્વ્રતે પરિમાણં ય-, ત્તસ્ય સંક્ષેપણં પુનઃ ।
દિને રાત્રૌ ચ દેશાવ-, કાશિકવ્રતમુચ્યતે ॥૮૪॥
ચતુષ્પર્વ્યાં ચતુર્થાદિ-, કુવ્યાપારનિષેધનમ્ ।
બ્રહ્મચર્યક્રિયા સ્નાના-, દિત્યાગઃ પૌષધવ્રતમ્ ॥૮૫॥
ગૃહિણોઽપિ હિ ધન્યાસ્તે, પુણ્યં યે પૌષધવ્રતમ્ ।
દુષ્પાલં પાલયન્ત્યેવ, યથા સ ચુલનીપિતા ॥૮૬॥
દાનં ચતુર્વિધાહાર-પાત્રાચ્છાદનસદ્મનામ્ ।
અતિથિભ્યોઽતિથિસંવિ-, ભાગવ્રતમુદીરિતમ્ ॥૮૭॥
પશ્ય સઙ્ગમકો નામ, સમ્પદં વત્સપાલકઃ ।
ચમત્કારકરીં પ્રાપ, મુનિદાનપ્રભાવતઃ ॥૮૮॥
વ્રતાનિ સાતિચારાણિ, સુકૃતાય ભવન્તિ ન ।
અતિચારાસ્તતો હેયાઃ, પઞ્ચ પઞ્ચ વ્રતે વ્રતે ॥૮૯॥
ક્રોધાદ્ બન્ધચ્છવિચ્છેદો-, ઽધિકભારાધિરોપણમ્ ।
પ્રહારોઽન્નાદિરોધશ્ચા-, હિંસાયાં પરિકીર્તિતાઃ ॥૯૦॥
મિથ્યોપદેશઃ સહસા-, ઽભ્યાખ્યાનં ગુહ્યભાષણમ્ ।
વિશ્વસ્તમન્ત્રભેદશ્ચ, કૂટલેખશ્ચ સૂનૃતે ॥૯૧॥
સ્તેનાનુજ્ઞા તદાનીતા-, દાનં દ્વિડ્રાજ્યલઙ્ઘનમ્ ।
પ્રતિરૂપક્રિયા માના-, ન્યત્વં ચાસ્તેયસંશ્રિતાઃ ॥૯૨॥
ઇત્વરાત્તાગમોઽનાત્તા-, ગતિરન્યવિવાહનમ્ ।
મદનાત્યાગ્રહોઽનઙ્ગ-, ક્રીડા ચ બ્રહ્મણિ સ્મૃતાઃ ॥૯૩॥
ધનધાન્યસ્ય કુપ્યસ્ય, ગવાદેઃ ક્ષેત્રવાસ્તુનઃ ।
હિરણ્યહેમ્નશ્ચ સંખ્યા-, ઽતિક્રમોઽત્ર પરિગ્રહે ॥૯૪॥
બન્ધનાદ્ ભાવતો ગર્ભાદ્, યોજનાદ્દાનતસ્તથા ।
પ્રતિપન્નવ્રતસ્યૈષ, પઞ્ચધાઽપિ ન યુજ્યતે ॥૯૫॥
સ્મૃત્યન્તર્ધાનમૂર્ધ્વાધ-, સ્તિર્યગ્ભાગવ્યતિક્રમઃ ।
ક્ષેત્રવૃદ્ધિશ્ચ પઞ્ચેતિ, સ્મૃતા દિગ્વિરતિવ્રતે ॥૯૬॥
સચિત્તસ્તેનસંબદ્ધઃ, સંમિશ્રોઽભિષવસ્તથા ।

દુષ્પક્વાહાર ઇત્યેતે, ભોગોપભોગમાનગાઃ ॥૯૭॥
અમી ભોજનતસ્ત્યાજ્યાઃ, કર્મતઃ ખરકર્મ તુ ।
તસ્મિન્ પઞ્ચદશ મલાન્, કર્માદાનાનિ સંત્યજેત્ ॥૯૮॥
અઙ્ગારવનશકટ-, ભાટકસ્ફોટજીવિકા ।
દન્તલાક્ષારસકેશ-, વિષવાણિજ્યકાનિ ચ ॥૯૯॥
યન્ત્રપીડા નિર્લાઞ્છન-, મસતીપોષણં તથા ।
દવદાનં સરઃશોષ, ઇતિ પઞ્ચદશ ત્યજેત્ ॥૧૦૦॥
અઙ્ગારભ્રાષ્ટ્રકરણં, કુમ્ભાયઃસ્વર્ણકારિતા ।
ઠઠારત્વેષ્ટકાપાકા, -વિતિ હ્યઙ્ગારજીવિકા ॥૧૦૧॥
છિન્નાચ્છિન્નવનપત્ર-, પ્રસૂનફલવિક્રયઃ ।
કણાનાં દલનાત્ પેષાદ્, વૃત્તિશ્ચ વનજીવિકા ॥૧૦૨॥
શકટાનાં તદઙ્ગાનાં, ઘટનં ખેટનં તથા ।
વિક્રયશ્ચેતિ શકટ, -જીવિકા પરિકીર્તિતા ॥૧૦૩॥
શકટોક્ષલુલાયોષ્ટ્ર, -ખરાશ્વતરવાજિનામ્ ।
ભારસ્ય વહનાદ્ વૃત્તિ, -ર્ભવેદ્ ભાટકજીવિકા ॥૧૦૪॥
સરઃ કૂપાદિખનન, -શિલાકુટ્ટનકર્મભિઃ ।
પૃથિવ્યારમ્ભસમ્ભૂતૈ, -ર્જીવનં સ્ફોટજીવિકા ॥૧૦૫॥
દન્તકેશનખાસ્થિત્વ, -ગ્રોમ્ણો ગ્રહણમાકરે ।
ત્રસાઙ્ગસ્ય વણિજ્યાર્થં, દન્તવાણિજ્યમુચ્યતે ॥૧૦૬॥
લાક્ષામનઃશિલાનીલી, -ધાતકીટઙ્કણાદિનઃ ।
વિક્રયઃ પાપસદનં, લાક્ષાવાણિજ્યમુચ્યતે ॥૧૦૭॥
નવનીતવસાક્ષૌદ્ર, -મદ્યપ્રભૃતિવિક્રયઃ ।
દ્વિપાચ્ચતુષ્પાદ્વિક્રયો, વાણિજ્યં રસકેશયોઃ ॥૧૦૮॥
વિષાસ્ત્રહલયન્ત્રાયો, -હરિતાલાદિવસ્તુનઃ ।
વિક્રયો જીવિતઘ્નસ્ય, વિષવાણિજ્યમુચ્યતે ॥૧૦૯॥
તિલેક્ષુસર્ષપૈરણ્ડ, -જલયન્ત્રાદિપીડનમ્ ।
દલતૈલસ્ય ચ કૃતિ, -ર્યન્ત્રપીડા પ્રકીર્તિતા ॥૧૧૦॥
નાસાવેધોઙ્કનં મુષ્ક, -ચ્છેદનં પૃષ્ઠગાલનમ્ ।
કર્ણકમ્બલવિચ્છેદો, નિર્લાઞ્છનમુદીરિતમ્ ॥૧૧૧॥
સારિકાશુકમાર્જાર, -શ્વકુર્કુટકલાપિનામ્ ।
પોષો દાસ્યાશ્ચ વિત્તાર્થ, -મસતીપોષણં વિદુઃ ॥૧૧૨॥
વ્યસનાત્ પુણ્યબુદ્ધ્યા વા, દવદાનં ભવેદ્ દ્વિધા ।
સરઃશોષઃ સરઃસિન્ધુ, -હ્રદાદેરમ્બુસંપ્લવઃ ॥૧૧૩॥
સંયુક્તાધિકરણત્વ, -મુપભોગાતિરિક્તતા ।
મૌખર્યમથ કૌત્કુચ્યં, કન્દર્પોઽનર્થદણ્ડગાઃ ॥૧૧૪॥
કાયવાઙ્મનસાં દુષ્ટ, -પ્રણિધાનમનાદરઃ ।
સ્મૃત્યનુપસ્થાપનં ચ, સ્મૃતાઃ સામાયિકવ્રતે ॥૧૧૫॥
પ્રેષ્યપ્રયોગાનયને, પુદ્ગલક્ષેપણં તથા ।
શબ્દરૂપાનુપાતૌ ચ, વ્રતે દેશાવકાશિકે ॥૧૧૬॥
ઉત્સર્ગાદાનસંસ્તારા-નનવેક્ષ્યાપ્રમૃજ્ય ચ ।
અનાદરઃ સ્મૃત્યનુપ-સ્થાપનં ચેતિ પૌષધે ॥૧૧૭॥
સચિત્તે ક્ષેપણં તેન, પિધાનં કાલલઙ્ઘનમ્ ।
મત્સરોઽન્યાપદેશશ્ચ, તુર્યશિક્ષાવ્રતે સ્મૃતાઃ ॥૧૧૮॥
એવં વ્રતસ્થિતો ભક્ત્યા, સપ્તક્ષેત્ર્યાં ધનં વપન્ ।
દયયા ચાતિદીનેષુ, મહાશ્રાવક ઉચ્યતે ॥૧૧૯॥
યઃ સદ્ બાહ્યમનિત્યં ચ, ક્ષેત્રેષુ ન ધનં વપેત્ ।

કથં વરાકશ્ચારિત્રં, દુશ્ચરં સ સમાચરેત્ ॥૧૨૦॥
બ્રાહ્મે મુહૂર્ત્ત ઉત્તિષ્ઠેત્, પરમેષ્ઠિસ્તુતિં પઠન્ ।
કિંધર્મા કિંકુલશ્ચાસ્મિ, કિંવ્રતોઽસ્મીતિ ચ સ્મરન્ ॥૧૨૧॥
શુચિઃ પુષ્પામિષસ્તોત્રૈ, -ર્દેવમભ્યર્ચ્ય વેશ્મનિ ।
પ્રત્યાખ્યાનં યથાશક્તિ, કૃત્વા દેવગૃહં વ્રજેત્ ॥૧૨૨॥
પ્રવિશ્ય વિધિના તત્ર, ત્રિઃ પ્રદક્ષિણયેજ્જિનમ્ ।
પુષ્પાદિભિસ્તમભ્યર્ચ્ય, સ્તવનૈરુત્તમૈઃ સ્તુયાત્ ॥૧૨૩॥
તતો ગુરૂણામભ્યર્ણે, પ્રતિપત્તિપુરઃસરમ્ ।
વિદધીત વિશુદ્ધાત્મા, પ્રત્યાખ્યાનપ્રકાશનમ્ ॥૧૨૪॥
અભ્યુત્થાનં તદાલોકે, -ઽભિયાનં ચ તદાગમે ।
શિરસ્યઞ્જલિસંશ્લેષઃ, સ્વયમાસનઢૌકનમ્ ॥૧૨૫॥
આસનાભિગ્રહો ભક્ત્યા, વન્દના પર્યુપાસનમ્ ।
તદ્યાનેઽનુગમશ્ચેતિ, પ્રતિપત્તિરિયં ગુરોઃ ॥૧૨૬॥
તતઃ પ્રતિનિવૃત્તઃ સન્, સ્થાનં ગત્વા યથોચિતમ્ ।
સુધીર્ધર્માવિરોધેન, વિદધીતાર્થચિન્તનમ્ ॥૧૨૭॥
તતો માધ્યાહ્નિકીં પૂજાં, કુર્યાત્ કૃત્વા ચ ભોજનમ્ ।
તદ્વિદ્ભિઃ સહ શાસ્ત્રાર્થ, -રહસ્યાનિ વિચારયેત્ ॥૧૨૮॥
તતશ્ચ સન્ધ્યાસમયે, કૃત્વા દેવાર્ચનં પુનઃ ।
કૃતાવશ્યકકર્મા ચ, કુર્યાત્ સ્વાધ્યાયમુત્તમમ્ ॥૧૨૯॥
ન્યાય્યે કાલે તતો દેવ, -ગુરુસ્મૃતિપવિત્રિતઃ ।
નિદ્રામલ્પામુપાસીત, પ્રાયેણાબ્રહ્મવર્જકઃ ॥૧૩૦॥
નિદ્રાચ્છેદે યોષિદઙ્ગ, -સતત્ત્વં પરિચિન્તયેત્ ।
સ્થૂલભદ્રાદિસાધૂનાં, તન્નિવૃત્તિં પરામૃશન્ ॥૧૩૧॥
યકૃચ્છકૃન્મલશ્લેષ્મ, -મજ્જાસ્થિપરિપૂરિતાઃ ।
સ્નાયુસ્યૂતા બહીરમ્યાઃ, સ્ત્રિયશ્ચર્મપ્રસેવિકાઃ ॥૧૩૨॥
બહિરન્તર્વિપર્યાસઃ, સ્ત્રીશરીરસ્ય ચેદ્ ભવેત્ ।
તસ્યૈવ કામુકઃ કુર્યાદ્, ગૃધ્રગોમાયુગોપનમ્ ॥૧૩૩॥
સ્ત્રીશસ્ત્રેણાપિ ચેત્ કામો, જગદેતજ્જિગીષતિ ।
તુચ્છપિચ્છમયં શસ્ત્રં, કિં નાદત્તે સ મૂઢધીઃ? ॥૧૩૪॥
સઙ્કલ્પયોનિનાનેન, હહા! વિશ્વં વિડમ્બિતમ્ ।
તદુત્ખનામિ સઙ્કલ્પં, મૂલમસ્યેતિ ચિન્તયેત્ ॥૧૩૫॥
યો યઃ સ્યાદ્ બાધકો દોષ-સ્તસ્ય તસ્ય પ્રતિક્રિયામ્ ।
ચિન્તયેદ્ દોષમુક્તેષુ, પ્રમોદં યતિષુ વ્રજન્ ॥૧૩૬॥
દુઃસ્થાં ભવસ્થિતિં સ્થેમ્ના, સર્વજીવેષુ ચિન્તયન્ ।
નિસર્ગસુખસર્ગં તે, -ષ્વપવર્ગં વિમાર્ગયેત્ ॥૧૩૭॥
સંસર્ગેઽપ્યુસર્ગાણાં, દૃઢવ્રતપરાયણાઃ ।
ધન્યાસ્તે કામદેવાદ્યાઃ, શ્લાધ્યાસ્તીર્થકૃતામપિ ॥૧૩૮॥
જિનો દેવઃ કૃપા ધર્મો, ગુરવો યત્ર સાધવઃ ।
શ્રાવકત્વાય કસ્તસ્મૈ, ન શ્લાઘેતાવિમૂઢધીઃ? ॥૧૩૯॥
જિનધર્મવિનિર્મુક્તો, મા ભૂવં ચક્રવર્ત્યપિ ।
સ્યાં ચેટોઽપિ દરિદ્રોઽપિ, જિનધર્માધિવાસિતઃ ॥૧૪૦॥
ત્યક્તસઙ્ગો જીર્ણવાસા, મલક્લિન્નકલેવરઃ ।
ભજન્ માધુકરીં વૃત્તિં, મુનિચર્યાં કદા શ્રયે? ॥૧૪૧॥
ત્યજન્ દુઃશીલસંસર્ગં, ગુરુપાદરજઃ સ્પૃશન્ ।
કદાહં યોગમભ્યસ્યન્, પ્રભવેયં ભવચ્છિદે? ॥૧૪૨॥
મહાનિશાયાં પ્રકૃતે, કાયોત્સર્ગે પુરાદ્ બહિઃ ।

સ્તમ્ભવત્ સ્કન્ધકષણં, વૃષાઃ કુર્યુઃ કદા મયિ? ॥૧૪૩॥
વને પદ્માસનાસીનં, ક્રોડસ્થિતમૃગાર્ભકમ્ ।
કદાઽઽઘ્રાસ્યન્તિ વક્ત્રે માં, જરન્તો મૃગયૂથપાઃ? ॥૧૪૪॥
શત્રૌ મિત્રે તૃણે સ્ત્રૈણે, સ્વર્ણેઽશ્મનિ મણૌ મૃદિ ।
મોક્ષે ભવે ભવિષ્યામિ, નિર્વિશેષમતિઃ કદા? ॥૧૪૫॥
અધિરોઢું ગુણશ્રેણિં, નિઃશ્રેણીં મુક્તિવેશ્મનઃ ।
પરાનન્દલતાકન્દાન્ કુર્યાદિતિ મનોરથાન્ ॥૧૪૬॥
ઇત્યાહોરાત્રિકીં ચર્યા, -મપ્રમત્તઃ સમાચરન્ ।
યથાવદુક્તવૃત્તસ્થો, ગૃહસ્થોઽપિ વિશુધ્યતિ ॥૧૪૭॥
સોઽથાવશ્યકયોગાનાં, ભઙ્ગે મૃત્યોરથાગમે ।
કૃત્વા સંલેખનામાદૌ, પ્રતિપદ્ય ચ સંયમમ્ ॥૧૪૮॥
જન્મદીક્ષાજ્ઞાનમોક્ષ-સ્થાનેષુ શ્રીમદર્હતામ્ ।
તદભાવે ગૃહેઽરણ્યે, સ્થણ્ડિલે જન્તુવર્જિતે ॥૧૪૯॥
ત્યક્ત્વા ચતુર્વિધાહારં, નમસ્કારપરાયણઃ ।
આરાધનાં વિધાયોચ્ચૈ, -શ્ચતુઃશરણમાશ્રિતઃ ॥૧૫૦॥
ઇહલોકે પરલોકે, જીવિતે મરણે તથા ।
ત્યક્ત્વાશંસાં નિદાનં ચ, સમાધિસુધયોક્ષિતઃ ॥૧૫૧॥
પરીષહોપસર્ગેભ્યો, નિર્ભીકો જિનભક્તિભાક્ ।
પ્રતિપદ્યેત મરણ-માનન્દઃ શ્રાવકો યથા ॥૧૫૨॥
પ્રાપ્તઃ સ કલ્પેષ્વિન્દ્રત્વ, -મન્યદ્વા સ્થાનમુત્તમમ્ ।
મોદતેઽનુત્તરપ્રાજ્ય, -પુણ્યસંભારભાક્ તતઃ ॥૧૫૩॥
ચ્યુત્વોત્પદ્ય મનુષ્યેષુ, ભુક્ત્વા ભોગાન્ સુદુર્લભાન્ ।
વિરક્તો મુક્તિમાપ્નોતિ, શુદ્ધાત્માન્તર્ભવાષ્ટકમ્ ॥૧૫૪॥
ઇતિ સંક્ષેપતઃ સમ્યગ્, રત્નત્રયમુદીરિતમ્ ।
સર્વોઽપિ યદનાસાદ્ય, નાસાદયતિ નિર્વૃતિમ્ ॥૧૫૫॥

## ચતુર્થઃ પ્રકાશઃ

આત્મૈવ દર્શનજ્ઞાન,- ચારિત્રાણ્યથવા યતેઃ ।
યત્તદાત્મક એવૈષ, શરીરમધિતિષ્ઠતિ ॥૧॥
આત્માનમાત્માના વેત્તિ, મોહત્યાગાદ્ય આત્મનિ ।
તદેવ તસ્ય ચારિત્રં, તજ્જ્ઞાનં તચ્ચ દર્શનમ્ ॥૨॥
આત્માજ્ઞાનભવં દુઃખ, -માત્મજ્ઞાનેન હન્યતે ।
તપસાઽપ્યાત્મવિજ્ઞાન, -હીનૈશ્છેત્તું ન શક્યતે ॥૩॥
અયમાત્મૈવ ચિદ્રૂપઃ શરીરી કર્મયોગતઃ ।
ધ્યાનાગ્નિદગ્ધકર્મા તુ, સિદ્ધાત્મા સ્યાન્નિરઞ્જનઃ ॥૪॥
અયમાત્મૈવ સંસારઃ, કષાયેન્દ્રિયનિર્જિતઃ ।
તમેવ તદ્વિજેતારં, મોક્ષમાહુર્મનીષિણઃ ॥૫॥
સ્યુઃ કષાયાઃ ક્રોધમાન, -માયાલોભાઃ શરીરિણામ્ ।
ચતુર્વિધાસ્તે પ્રત્યેકં, ભેદૈઃ સંજ્વલનાદિભિઃ ॥૬॥
પક્ષં સંજ્વલનઃ પ્રત્યા-ખ્યાનો માસચતુષ્ટયમ્ ।
અપ્રત્યાખ્યાનકો વર્ષં, જન્માનન્તાનુબન્ધકઃ ॥૭॥
વીતરાગયતિશ્રાદ્ધ, -સમ્યગ્દૃષ્ટિત્વઘાતકાઃ ।
તે દેવત્વમનુષ્યત્વ, -તિર્યક્ત્વનરકપ્રદાઃ ॥૮॥
તત્રોપતાપકઃ ક્રોધઃ, ક્રોધો વૈરસ્ય કારણમ્ ।
દુર્ગતેર્વર્તની ક્રોધઃ, ક્રોધઃ શમસુખાર્ગલા ॥૯॥
ઉત્પદ્યમાનઃ પ્રથમં, દહત્યેવ સ્વમાશ્રયમ્ ।
ક્રોધઃ કૃશાનુવત્પશ્ચા-દન્યં દહતિ વા ન વા ॥૧૦॥

ક્રોધવહ્નેસ્તદહ્નાય, શમનાય શુભાત્મભિઃ ।
શ્રયણીયા ક્ષમૈકૈવ, સંયમારામસારણિઃ ॥૧૧॥
વિનયશ્રુતશીલાનાં, ત્રિવર્ગસ્ય ચ ઘાતકઃ ।
વિવેકલોચનં લુમ્પન્, માનોઽન્ધઙ્કરણો નૃણામ્ ॥૧૨॥
જાતિલાભકુલૈશ્વર્ય-બલરૂપતપઃશ્રુતૈઃ ।
કુર્વન્ મદં પુનસ્તાનિ, હીનાનિ લભતે જનઃ ॥૧૩॥
ઉત્સર્પયન્ દોષશાખા, ગુણમૂલાન્યધો નયન્ ।
ઉન્મૂલનીયો માનદ્રુ-સ્તન્માર્દવસરિત્પ્લવૈઃ ॥૧૪॥
અસૂનૃતસ્ય જનની, પરશુઃ શીલશાખિનઃ ।
જન્મભૂમિરવિદ્યાનાં, માયા દુર્ગતિકારણમ્ ॥૧૫॥
કૌટિલ્યપટવઃ પાપા, માયયા બકવૃત્તયઃ ।
ભુવનં વઞ્ચયમાના, વઞ્ચયન્તે સ્વમેવ હિ ॥૧૬॥
તદાર્જવમહૌષધ્યા, જગદાનન્દહેતુના ।
જયેજ્જગદ્દ્રોહકરીં, માયાં વિષધરીમિવ ॥૧૭॥
આકરઃ સર્વદોષાણાં, ગુણગ્રસનરાક્ષસઃ ।
કન્દો વ્યસનવલ્લીનાં, લોભઃ સર્વાર્થબાધકઃ ॥૧૮॥
ધનહીનઃ શતમેકં, સહસ્રં શતવાનપિ ।
સહસ્રાધિપતિર્લક્ષં, કોટિં લક્ષેશ્વરોઽપિ ચ ॥૧૯॥
કોટીશ્વરો નરેન્દ્રત્વં, નરેન્દ્રશ્ચક્રવર્તિતામ્ ।
ચક્રવર્તી ચ દેવત્વં, દેવોઽપીન્દ્રત્વમિચ્છતિ ॥૨૦॥
ઇન્દ્રત્વેઽપિ હિ સંપ્રાપ્તે, યદિચ્છા ન નિવર્તતે ।
મૂલે લઘીયાંસ્તલ્લોભઃ, શરાવ ઇવ વર્ધતે ॥૨૧॥
લોભસાગરમુદ્વેલ-મતિવેલં મહામતિઃ ।
સંતોષસેતુબન્ધેન, પ્રસરન્તં નિવારયેત્ ॥૨૨॥
ક્ષાન્ત્યા ક્રોધો મૃદુત્વેન, માનો માયાર્જવેન ચ ।
લોભશ્ચાનીહયા જેયાઃ, કષાયા ઇતિ સંગ્રહઃ ॥૨૩॥
વિનેન્દ્રિયજયં નૈવ, કષાયાઞ્જેતુમીશ્વરઃ ।
હન્યતે હૈમનં જાડ્યં, ન વિના જ્વલિતાનલમ્ ॥૨૪॥
અદાન્તૈરિન્દ્રિયહયૈ-, શ્ચલૈરપથગામિભિઃ ।
આકૃષ્ય નરકારણ્યે, જન્તુઃ સપદિ નીયતે ॥૨૫॥
ઇન્દ્રિયૈર્વિજિતો જન્તુઃ, કષાયૈરભિભૂયતે ।
વીરૈઃ કૃષ્ટેષ્ટકઃ પૂર્વં, વપ્રઃ કૈઃ કૈર્ન ખણ્ડ્યતે? ॥૨૬॥
કુલઘાતાય પાતાય, બન્ધાય ચ વધાય ચ ।
અનિર્જિતાનિ જાયન્તે, કરણાનિ શરીરિણામ્ ॥૨૭॥
વશાસ્પર્શ-સુખાસ્વાદ, -પ્રસારિતકરઃ કરી ।
આલાનબન્ધનક્લેશ-, માસાદયતિ તત્ક્ષણાત્ ॥૨૮॥
પયસ્યગાધે વિચરન્, ગિલન્ ગલગતામિષમ્ ।
મૈનિકસ્ય કરે દીનો, મીનઃ પતતિ નિશ્ચિતમ્ ॥૨૯॥
નિપતન્ મત્તમાતઙ્ગ-, કપોલે ગન્ધલોલુપઃ ।
કર્ણતાલતલાઘાતાદ્, મૃત્યુમાપ્નોતિ ષટ્પદઃ ॥૩૦॥
કનકચ્છેદસંકાશ-, શિખાલોકવિમોહિતઃ ।
રભસેન પતન્ દીપે, શલભો લભતે મૃતિમ્ ॥૩૧॥
હરિણો હારિણીં ગીતિ-, માકર્ણયિતુમુદ્ધુરઃ ।
આકર્ણાકૃષ્ટચાપસ્ય, યાતિ વ્યાધસ્ય વેધ્યતામ્ ॥૩૨॥
એવં વિષય એકૈકઃ, પઞ્ચત્વાય નિષેવિતઃ ।
કથં હિ યુગપત્ પઞ્ચ, પઞ્ચત્વાય ભવન્તિ ન? ॥૩૩॥

તદિન્દ્રિયજયં કુર્યાદ્, મનઃશુદ્ધયા મહામતિઃ ।
યાં વિના યમનિયમૈઃ, કાયક્લેશો વૃથા નૃણામ્ ॥૩૪॥
મનઃક્ષપાચરો ભ્રામ્ય, -ન્નપશઙ્કં નિરઙ્કુશઃ ।
પ્રપાતયતિ સંસારા-, ડવર્ત્તગર્ત્તે જગત્ત્રયીમ્ ॥૩૫॥
તપ્યમાનાંસ્તપો મુક્તૌ, ગન્તુકામાન્ શરીરિણઃ ।
વાત્યેવ તરલં ચેતઃ, ક્ષિપત્યન્યત્ર કુત્રચિત્ ॥૩૬॥
અનિરુદ્ધમનસ્કઃ સન્, યોગશ્રદ્ધાં દધાતિ યઃ ।
પદ્ભ્યાં જિગમિષુર્ગ્રામં, સ પઙ્ગુરિવ હસ્યતે ॥૩૭॥
મનોરોધે નિરુધ્યન્તે, કર્માણ્યપિ સમન્તતઃ ।
અનિરુદ્ધમનસ્કસ્ય, પ્રસરન્તિ હિ તાન્યપિ ॥૩૮॥
મનઃકપિરયં વિશ્વ-પરિભ્રમણલમ્પટઃ ।
નિયન્ત્રણીયો યત્નેન, મુક્તિમિચ્છુભિરાત્મનઃ ॥૩૯॥
દીપિકા ખલ્વનિર્વાણા, નિર્વાણપથદર્શિની ।
એકૈવ મનસઃ શુદ્ધિઃ, સમામ્નાતા મનીષિભિઃ ॥૪૦॥
સત્યાં હિ મનસઃ શુદ્ધૌ, સન્ત્યસન્તોઽપિ સદ્ગુણાઃ ।
સન્તોઽપ્યસત્યાં નો સન્તિ, સૈવ કાર્યા બુધૈસ્તતઃ ॥૪૧॥
મનઃશુદ્ધિમબિભ્રાણા, યે તપસ્યન્તિ મુક્તયે ।
ત્યક્ત્વા નાવં ભુજાભ્યાં તે, તિતીર્ષન્તિ મહાવર્ણવમ્ ॥૪૨॥
તપસ્વિનો મનઃશુદ્ધિ-વિનાભૂતસ્ય સર્વથા ।
ધ્યાનં ખલુ મુધા ચક્ષુ-ર્વિકલસ્યેવ દર્પણઃ ॥૪૩॥
તદવશ્યં મનઃશુદ્ધિઃ, કર્તવ્યા સિદ્ધિમિચ્છતા ।
તપઃશ્રુતયમપ્રાયૈઃ, કિમન્યૈઃ, કાયદણ્ડનૈઃ ॥૪૪॥
મનશુદ્ધયૈ ચ કર્તવ્યો, રાગદ્વેષવિનિર્જયઃ ।
કાલુષ્યં યેન હિત્વાત્મા, સ્વસ્વરૂપેઽવતિષ્ઠતે ॥૪૫॥
આત્માયત્તમપિ સ્વાન્તં, કુર્વતામપિ યોગિનામ્ ।
રાગાદિભિઃ સમાક્રમ્ય, પરાયત્તં વિધીયતે ॥૪૬॥
રક્ષ્યમાણમપિ સ્વાન્તં, સમાદાય મનાઙ્ મિષમ્ ।
પિશાચા ઇવ રાગાદ્યા, -શ્છલયન્તિ મુહુર્મુહુઃ ॥૪૭॥
રાગાદિતિમિરધ્વસ્ત, -જ્ઞાનેન મનસા જનઃ ।
અન્ધેનાન્ધ ઇવાકૃષ્ટઃ, પાત્યતે નરકાવટે ॥૪૮॥
અસ્તતન્દ્રૈરતઃ પુંભિ, -ર્નિર્વાણપદકાઙ્ક્ષિભિઃ ।
વિધાતવ્યઃ સમત્વેન, રાગદ્વેષદ્વિષજ્જયઃ ॥૪૯॥
અમન્દાનન્દજનને, સામ્યવારિણિ મજ્જતામ્ ।
જાયતે સહસા પુંસાં, રાગદ્વેષમલક્ષયઃ ॥૫૦॥
પ્રણિહન્તિ ક્ષણાર્ધેન, સામ્યમાલમ્બ્ય કર્મ તત્ ।
યન્ન હન્યાન્નરસ્તીવ્ર-, તપસા જન્મકોટિભિઃ ॥૫૧॥
કર્મ જીવં ચ સંશ્લિષ્ટં, પરિજ્ઞાતાત્મનિશ્ચયઃ ।
વિભિન્નીકુરુતે સાધુઃ, સામાયિકશલાક્યા ॥૫૨॥
રાગાદિધ્વાન્તવિધ્વંસે, કૃતે સામાયિકાંશુના ।
સ્વસ્મિન્ સ્વરૂપં પશ્યન્તિ, યોગિનઃ પરમાત્મનઃ ॥૫૩॥
સ્નિહ્યન્તિ જન્તવો નિત્યં, વૈરિણોઽપિ પરસ્પરમ્ ।
અપિ સ્વાર્થકૃતે સામ્ય-ભાજઃ સાધોઃ પ્રભાવતઃ ॥૫૪॥
સામ્યં સ્યાન્નિર્મમત્વેન, તત્કૃતે ભાવનાઃ શ્રયેત્ ।
અનિત્યતામશરણં, ભવમેકત્વમન્યતામ્ ॥૫૫॥
અશૌચમાશ્રવવિધિં, સંવરં કર્મનિર્જરામ્ ।
ધર્મસ્વાખ્યાતતાં લોકં, દ્વાદશીં બોધિભાવનામ્ ॥૫૬॥

યત્પ્રાતસ્તન્ન મધ્યાહ્ને, યન્મધ્યાહ્ને ન તન્નિશિ ।
નિરીક્ષ્યતે ભવેઽસ્મિન્ હી!, પદાર્થાનામનિત્યતા ॥૫૭॥
શરીરં દેહિનાં સર્વ, -પુરુષાર્થનિબન્ધનમ્ ।
પ્રચણ્ડપવનોદ્ધૂત, -ઘનાઘનવિનશ્વરમ્ ॥૫૮॥
કલ્લોલચપલા લક્ષ્મીઃ, સઙ્ગમાઃ સ્વપ્નસંનિભાઃ ।
વાત્યાવ્યતિકરોત્ક્ષિપ્ત, -તૂલતુલ્યં ચ યૌવનમ્ ॥૫૯॥
ઇત્યનિત્યં જગદ્વૃત્તં, સ્થિરચિત્તઃ પ્રતિક્ષણમ્ ।
તૃષ્ણાકૃષ્ણાહિમન્ત્રાય, નિર્મમત્વાય ચિન્તયેત્ ॥૬૦॥
ઇન્દ્રોપેન્દ્રાદયોઽપ્યેતે, યન્મૃત્યોર્યાન્તિ ગોચરમ્ ।
અહો! તદન્તકાતઙ્કે, કઃ શરણ્યઃ શરીરિણામ્ ॥૬૧॥
પિતુર્માતુઃ સ્વસુર્ભ્રાતુ-સ્તનયાનાં ચ પશ્યતામ્ ।
અત્રાણો નીયતે જન્તુઃ, કર્મભિર્યમસદ્મનિ ॥૬૨॥
શોચન્તે સ્વજનાનન્તં, નીયમાનાન્ સ્વકર્મભિઃ ।
નેષ્યમાણં તુ શોચન્તિ, નાત્માનં મૂઢબુદ્ધયઃ ॥૬૩॥
સંસારે દુઃખદાવાગ્નિ, -જ્વલજ્જ્વાલાકરાલિતે ।
વને મૃગાર્ભકસ્યેવ, શરણં નાસ્તિ દેહિનઃ ॥૬૪॥
શ્રોત્રિયઃ શ્વપચઃ સ્વામી, પત્તિર્બ્રહ્મા કૃમિશ્ચ સઃ ।
સંસારનાટ્યે નટવત્, સંસારી હન્ત! ચેષ્ટતે ॥૬૫॥
ન યાતિ કતમાં યોનિં, કતમાં વા ન મુઞ્ચતિ ।
સંસારી કર્મસમ્બન્ધા, -દવક્રયકુટીમિવ ॥૬૬॥
સમસ્તલોકાકાશેઽપિ, નાનારૂપૈઃ સ્વકર્મતઃ ।
વાલાગ્રમપિ તન્નાસ્તિ, યન્ન સ્પૃષ્ટં શરીરિભિઃ ॥૬૭॥
એક ઉત્પદ્યતે જન્તુ-રેક એવ વિપદ્યતે ।
કર્માણ્યનુભવત્યેકઃ, પ્રચિતાનિ ભવાન્તરે ॥૬૮॥
અન્યૈસ્તેનાર્જિતં વિત્તં, ભૂયઃ સંભૂય ભુજ્યતે ।
સ ત્વેકો નરકક્રોડે, ક્લિશ્યતે નિજકર્મભિઃ ॥૬૯॥
યત્રાન્યત્વં શરીરસ્ય, વૈસદૃશ્યાચ્છરીરિણઃ ।
ધનબન્ધુસહાયાનાં, તત્રાન્યત્વં ન દુર્વચમ્ ॥૭૦॥
યો દેહધનબન્ધુભ્યો, ભિન્નમાત્માનમીક્ષતે ।
ક્વ શોકશઙ્કુના તસ્ય, હન્તાતઙ્કઃ પ્રતન્યતે ॥૭૧॥
રસાસૃઙ્માંસમેદોઽસ્થિ-મજ્જાશુક્રાન્ત્રવર્ચસામ્ ।
અશુચીનાં પદં કાયઃ, શુચિત્વં તસ્ય તત્કુતઃ? ॥૭૨॥
નવસ્રોતઃસ્રવદ્વિસ્ર-રસનિઃસ્યન્દપિચ્છિલે ।
દેહેઽપિ શૌચસઙ્કલ્પો, મહન્મોહવિજૃમ્ભિતમ્ ॥૭૩॥
મનોવાક્કાયકર્માણિ, યોગાઃ કર્મ શુભાશુભમ્ ।
યદાશ્રવન્તિ જન્તૂના-, માશ્રવાસ્તેન કીર્તિતાઃ ॥૭૪॥
મૈત્ર્યાદિવાસિતં ચેતઃ, કર્મ સૂતે શુભાત્મકમ્ ।
કષાયવિષયાક્રાન્તં, વિતનોત્યશુભં પુનઃ ॥૭૫॥
શુભાર્જનાય નિર્મિથ્યં, શ્રુતજ્ઞાનાશ્રિતં વચઃ ।
વિપરીતં પુનર્જ્ઞેય-મશુભાર્જનહેતવે ॥૭૬॥
શરીરેણ સુગુપ્તેન, શરીરી ચિનુતે શુભમ્ ।
સતતારમ્ભિણા જન્તુ, -ઘાતકેનાશુભં પુનઃ ॥૭૭॥
કષાયા વિષયા યોગાઃ, પ્રમાદાવિરતી તથા ।
મિથ્યાત્વમાર્તરૌદ્રે ચે, -ત્યશુભં પ્રતિ હેતવઃ ॥૭૮॥
સર્વેષામાશ્રવાણાં તુ, નિરોધઃ સંવરઃ સ્મૃતઃ ।
સ પુનર્ભિદ્યતે દ્વેધા, દ્રવ્યભાવવિભેદતઃ ॥૭૯॥

યઃ કર્મપુદ્ગલાદાન, -ચ્છેદઃ સ દ્રવ્યસંવરઃ ।
ભવહેતુક્રિયાત્યાગઃ, સ પુનર્ભાવસંવરઃ ॥૮૦॥
યેન યેન હ્યુપાયેન, રુધ્યતે યો ય આશ્રવઃ ।
તસ્ય તસ્ય નિરોધાય, સ સ યોજ્યો મનીષિભિઃ ॥૮૧॥
ક્ષમયા મૃદુભાવેન, ઋજુત્વેનાઽપ્યનીહયા ।
ક્રોધં માનં તથા માયાં, લોભં રુન્ધ્યાદ્યથાક્રમમ્ ॥૮૨॥
અસંયમકૃતોત્સેકાન્, વિષયાન્ વિષસંનિભાન્ ।
નિરાકુર્યાદખણ્ડેન, સંયમેન મહામતિઃ ॥૮૩॥
તિસૃભિર્ગુપ્તિભિર્યોગાન્, પ્રમાદં ચાપ્રમાદતઃ ।
સાવદ્યયોગહાનેના-, ઽવિરતિં ચાપિ સાધયેત્ ॥૮૪॥
સદ્દર્શનેન મિથ્યાત્વં, શુભસ્થૈર્યેણ ચેતસઃ ।
વિજયેતાર્તરૌદ્રે ચ, સંવરાર્થં કૃતોદ્યમઃ ॥૮૫॥
સંસારબીજભૂતાનાં, કર્મણાં જરણાદિહ ।
નિર્જરા સા સ્મૃતા દ્વેધા, સકામા કામવર્જિતા ॥૮૬॥
જ્ઞેયા સકામા યમિના, -મકામા ત્વન્યદેહિનામ્ ।
કર્મણાં ફલવત્પાકો, યદુપાયાત્ સ્વતોઽપિ હિ ॥૮૭॥
સદોષમપિ દીપ્તેન, સુવર્ણં વહ્નિના યથા ।
તપોઽગ્નિના તપ્યમાન, -સ્તથા જીવો વિશુધ્યતિ ॥૮૮॥
અનશનમૌનોદર્યં, વૃત્તેઃ સંક્ષેપણં તથા ।
રસત્યાગસ્તનુક્લેશો, લીનતેતિ બહિસ્તપઃ ॥૮૯॥
પ્રાયશ્ચિત્તં વૈયાવૃત્ત્યં, સ્વાધ્યાયો વિનયોઽપિ ચ ।
વ્યુત્સર્ગોઽથ શુભં ધ્યાનં, ષોઢેત્યાભ્યન્તરં તપઃ ॥૯૦॥
દીપ્યમાને તપોવહ્નૌ, બાહ્યે ચાભ્યન્તરેઽપિ ચ ।
યમી જરતિ કર્માણિ, દુર્જરાણ્યપિ તત્ક્ષણાત્ ॥૯૧॥
સ્વાખ્યાતઃ ખલુ ધર્મોઽયં, ભગવદ્ભિર્જિનોત્તમૈઃ ।
યં સમાલમ્બમાનો હિ, ન મજ્જેદ્ ભવસાગરે ॥૯૨॥
સંયમઃ સૂનૃતં શૌચં, બ્રહ્માકિઞ્ચનતા તપઃ ।
ક્ષાન્તિર્માર્દવમૃજુતા, મુક્તિશ્ચ દશધા સ તુ ॥૯૩॥
ધર્મપ્રભાવતઃ કલ્પ, -દ્રુમાદ્યા દદતીપ્સિતમ્ ।
ગોચરેઽપિ ન તે યત્સ્યુ, -રધર્માધિષ્ઠિતાત્મનામ્ ॥૯૪॥
અપારે વ્યસનાઽમ્ભોધૌ, પતન્તં પાતિ દેહિનમ્ ।
સદા સવિધવર્ત્યેક, -બન્ધુર્ધર્મોઽતિવત્સલઃ ॥૯૫॥
આપ્લાવયતિ નામ્ભોધિ, -રાશ્વાસયતિ ચામ્બુદઃ ।
યન્મહીં સ પ્રભાવોઽયં, ધ્રુવં ધર્મસ્ય કેવલઃ ॥૯૬॥
ન જ્વલત્યનલસ્તિર્યગ્, યદૂર્ધ્વં વાતિ નાનિલઃ ।
અચિન્ત્યમહિમા તત્ર, ધર્મ એવ નિબન્ધનમ્ ॥૯૭॥
નિરાલમ્બા નિરાધારા, વિશ્વાધારો વસુંધરા ।
યચ્ચાવતિષ્ઠતે તત્ર, ધર્માદન્યન્ન કારણમ્ ॥૯૮॥
સૂર્યાચન્દ્રમસાવેતૌ, વિશ્વોપકૃતિહેતવે ।
ઉદયેતે જગત્યસ્મિન્, નૂનં ધર્મસ્ય શાસનાત્ ॥૯૯॥
અબન્ધૂનામસૌ બન્ધુ, -રસખીનામસૌ સખા ।
અનાથાનામસૌ નાથો, ધર્મો વિશ્વૈકવત્સલઃ ॥૧૦૦॥
રક્ષોયક્ષોરગવ્યાઘ્ર, -વ્યાલાનલગરાદયઃ ।
નાપકર્તુમલં તેષાં, યૈર્ધર્મઃ શરણં શ્રિતઃ ॥૧૦૧॥
ધર્મો નરકપાતાલ, -પાતાદવતિ દેહિનઃ ।
ધર્મો નિરુપમં યચ્છ, -ત્યપિ સર્વજ્ઞવૈભવમ્ ॥૧૦૨॥

કટિસ્થકરવૈશાખ, -સ્થાનકસ્થનરાકૃતિમ્ ।
દ્રવ્યૈઃ પૂર્ણં સ્મરેલ્લોકં, સ્થિત્યુત્પત્તિવ્યયાત્મકૈઃ ॥૧૦૩॥
લોકો જગત્ત્રયાકીર્ણો, ભુવઃ સપ્તાત્ર વેષ્ટિતાઃ ।
ઘનામ્ભોધિમહાવાત, -તનુવાતૈર્મહાબલૈઃ ॥૧૦૪॥
વેત્રાસનસમોઽધસ્તાન્, મધ્યતો ઝલ્લરીનિભઃ ।
અગ્રે મુરજસઙ્કાશો, લોકઃ સ્યાદેવમાકૃતિઃ ॥૧૦૫॥
નિષ્પાદિતો ન કેનાઽપિ, ન ધૃતઃ કેનચિચ્ચ સઃ ।
સ્વયંસિદ્ધો નિરાધારો, ગગને કિન્ત્વવસ્થિતઃ ॥૧૦૬॥
અકામનિર્જરારૂપાત્, પુણ્યાજ્જન્તોઃ પ્રજાયતે ।
સ્થાવરત્વાત્ત્રસત્વં વા, તિર્યક્ત્વં વા કથઞ્ચન ॥૧૦૭॥
માનુષ્યમાર્યદેશશ્ચ, જાતિઃ સર્વાક્ષપાટવમ્ ।
આયુશ્ચ પ્રાપ્યતે તત્ર, કથઞ્ચિત્કર્મલાઘવાત્ ॥૧૦૮॥
પ્રાપ્તેષુ પુણ્યતઃ શ્રદ્ધા, -કથકશ્રવણેષ્વપિ ।
તત્ત્વનિશ્ચયરૂપં તદ્, બોધિરત્નં સુદુર્લભમ્ ॥૧૦૯॥
ભાવનાભિરવિશ્રાન્ત, -મિતિ ભાવિતમાનસઃ ।
નિર્મમઃ સર્વભાવેષુ, સમત્વમવલમ્બતે ॥૧૧૦॥
વિષયેભ્યો વિરક્તાનાં, સામ્યવાસિતચેતસામ્ ।
ઉપશામ્યેત્ કષાયાગ્નિ, -ર્બોધિદીપઃ સમુન્મિષેત્ ॥૧૧૧॥
સમત્વમવલમ્બ્યાથ, ધ્યાનં યોગી સમાશ્રયેત્ ।
વિના સમત્વમારબ્ધે, ધ્યાને સ્વાત્મા વિડમ્બ્યતે ॥૧૧૨॥
મોક્ષઃ કર્મક્ષયાદેવ, સ ચાત્મજ્ઞાનતો ભવેત્ ।
ધ્યાનસાધ્યં મતં તચ્ચ, તદ્ધ્યાનં હિતમાત્મનઃ ॥૧૧૩॥
ન સામ્યેન વિના ધ્યાનં, ન ધ્યાનેન વિના ચ તત્ ।
નિષ્કમ્પં જાયતે તસ્માદ્, -દ્વયમન્યોન્યકારણમ્ ॥૧૧૪॥
મુહૂર્તાન્તર્મનઃસ્થૈર્યં, ધ્યાનં છદ્મસ્થયોગિનામ્ ।
ધર્મ્યં શુક્લં ચ તદ્ દ્વેધા, યોગરોધસ્ત્વયોગિનામ્ ॥૧૧૫॥
મુહૂર્તાત્ પરતશ્ચિન્તા, યદ્વા ધ્યાનાન્તરં ભવેત્ ।
બહ્વર્થસંક્રમે તુ સ્યાદ્, દીર્ઘાઽપિ ધ્યાનસંતતિઃ ॥૧૧૬॥
મૈત્રી-પ્રમોદ-કારુણ્ય, -માધ્યસ્થ્યાનિ નિયોજયેત્ ।
ધર્મ્યધ્યાનમુપસ્કર્તું, તદ્ધિ તસ્ય રસાયનમ્ ॥૧૧૭॥
મા કાર્ષીત્ કોઽપિ પાપાનિ, મા ચ ભૂત્ કોઽપિ દુઃખિતઃ ।
મુચ્યતાં જગદપ્યેષા, મતિર્મૈત્રી નિગદ્યતે ॥૧૧૮॥
અપાસ્તાશેષદોષાણાં, વસ્તુતત્ત્વાવલોકિનામ્ ।
ગુણેષુ પક્ષપાતો યઃ, સ પ્રમોદઃ પ્રકીર્તિતઃ ॥૧૧૯॥
દીનેષ્વાર્ત્તેષુ ભીતેષુ, યાચમાનેષુ જીવિતમ્ ।
પ્રતીકારપરા બુદ્ધિઃ, કારુણ્યમભિધીયતે ॥૧૨૦॥
ક્રૂરકર્મસુ નિઃશઙ્કં, દેવતાગુરુનિન્દિષુ ।
આત્મશંસિષુ યોપેક્ષા, તન્માધ્યસ્થ્યમુદીરિતમ્ ॥૧૨૧॥
આત્માનં ભાવયન્નાભિ, -ર્ભાવનાભિર્મહામતિઃ ।
ત્રુટિતામપિ સંધત્તે, વિશુદ્ધધ્યાનસંતતિમ્ ॥૧૨૨॥
તીર્થં વા સ્વસ્થતાહેતુ, યત્તદ્વા ધ્યાનસિદ્ધયે ।
કૃતાસનજયો યોગી, વિવિક્તં સ્થાનમાશ્રયેત્ ॥૧૨૩॥
પર્યઙ્કવીરવજ્રાબ્જ, -ભદ્રદણ્ડાસનાનિ ચ ।
ઉત્કટિકા ગોદોહિકા, કાયોત્સર્ગસ્તથાસનમ્ ॥૧૨૪॥
સ્યાજ્જઙ્ઘયોરધોભાગે, પાદોપરિ કૃતે સતિ ।
પર્યઙ્કો નાભિગોત્તાન, -દક્ષિણોત્તરપાણિકઃ ॥૧૨૫॥

વામોંડઙ્ઘ્રિર્દક્ષિણોરૂર્ધ્વં, વામોરૂપરિ દક્ષિણઃ ।
ક્રિયતે યત્ર તદ્વીરો-, ચિતં વીરાસનં સ્મૃતમ્ ॥૧૨૬॥
પૃષ્ઠે વજ્રાકૃતીભૂતે, દોર્ભ્યાં વીરાસને સતિ ।
ગૃહ્ણીયાત્ પાદયોર્યત્રા, -ઙ્ગુષ્ઠૌ વજ્રાસનં તુ તત્ ॥૧૨૭॥
સિંહાસનાધિરૂઢસ્યા, -સનાપનયને સતિ ।
તથૈવાવસ્થિતિર્યા તા, -મન્યે વીરાસનં વિદુઃ ॥૧૨૮॥
જઙ્ઘાયા મધ્યભાગે તુ, સંશ્લેષો યત્ર જઙ્ઘયા ।
પદ્માસનમિતિ પ્રોક્તં, તદાસનવિચક્ષણૈઃ ॥૧૨૯॥
સંપુટીકૃત્ય મુષ્કાગ્રે, તલપાદૌ તથોપરિ ।
પાણિકચ્છપિકાં કુર્યાદ્, યત્ર ભદ્રાસનં તુ તત્ ॥૧૩૦॥
શ્લિષ્ટાઙ્ગુલી શ્લિષ્ટગુલ્ફૌ, ભૂશ્લિષ્ટોરૂ પ્રસારયેત્ ।
યત્રોપવિશ્ય પાદૌ તદ્, દણ્ડાસનમુદીરિતમ્ ॥૧૩૧॥
પૂતપાર્ષ્ણિ-સમાયોગે, પ્રાહુરુત્કટિકાસનમ્ ।
પાર્ષ્ણિભ્યાં તુ ભુવસ્ત્યાગે, તત્સ્યાદ્ગોદોહિકાસનમ્ ॥૧૩૨॥
પ્રલમ્બિતભુજદ્વન્દ્વ, -મૂર્ધ્વસ્થસ્યાસિતસ્ય વા ।
સ્થાનં કાયાનપેક્ષં યત્, -કાયોત્સર્ગઃ સ કીર્તિતઃ ॥૧૩૩॥
જાયતે યેન યેનેહ, વિહિતેન સ્થિરં મનઃ ।
તત્તદેવ વિધાતવ્ય, -માસનં ધ્યાનસાધનમ્ ॥૧૩૪॥
સુખાસનસમાસીનઃ, સુશ્લિષ્ટાધરપલ્લવઃ ।
નાસાગ્રન્યસ્તદૃગ્દ્વન્દ્વો, દન્તૈર્દન્તાનસંસ્પૃશન્ ॥૧૩૫॥
પ્રસન્નવદનઃ પૂર્વા, -ભિમુખો વાપ્યુદઙ્મુખઃ ।
અપ્રમત્તઃ સુસંસ્થાનો, ધ્યાતા ધ્યાનોદ્યતો ભવેત્ ॥૧૩૬॥